॥ श्रीः ॥

# संस्कृतभाषादीपिका

## तृतीया

श्रीसुरसरस्वतीसभा

भृङ्गगिरिः

१९९३

॥ श्रीः ॥

# संस्कृतभाषादीपिका

## तृतीया

श्रीसुरसरस्वती सभा

शृङ्गगिरिः

१९९३

ಬೆಲೆ. ರೂ. 7–00

ಪರಿಷ್ಕೃತ ಸಂಸ್ಕರಣ : 1993

ಪ್ರತಿಗಳು : 5000

© ಹಕ್ಕನ್ನು ಕಾದಿರಿಸಲಾಗಿದೆ

ಸಂಸ್ಕೃತವನ್ನು ಕಲಿಯಿರಿ
ಸಂಸ್ಕೃತಿಯನ್ನು ತಿಳಿಯಿರಿ
ಸಂತಸವನ್ನು ಪಡೆಯಿರಿ

ಮುದ್ರಣ :

ಪ್ರಭಾ ಮುದ್ರಣಾಲಯ

ಬಸವನಗುಡಿ, ಬೆಂಗಳೂರು – 4

# ಮುನ್ನುಡಿ

ನಮ್ಮ ದೇಶಭಾಷೆಗಳಿಗೆಲ್ಲ ಮೂಲವೂ, ಆದ್ದರಿಂದಲೇ ಶ್ರೇಷ್ಠವೂ ಆದ ಸಂಸ್ಕೃತಭಾಷೆಯನ್ನು ಎಲ್ಲರೂ ಕಲಿಯಬೇಕೆಂಬುದು ಶ್ರೀ ಶ್ರೀ ಶೃಂಗೇರಿ ಜಗದ್ಗುರು ಮಹಾಸನ್ನಿಧಾನಂಗಳವರ ಆಶಯವಾಗಿ, ಈ ಉದ್ದೇಶದಿಂದ ಅವರು "ಶ್ರೀಸುರಸರಸ್ವತೀಸಭಾ" ಎಂಬ ಸಂಸ್ಥೆಯನ್ನು ಸ್ಥಾಪಿಸಿ ಪೋಷಿಸುತ್ತಿದ್ದು, ಈಗಿನ ಶ್ರೀ ಶ್ರೀ ಜಗದ್ಗುರು ಸನ್ನಿಧಾನಂಗಳವರೂ ಸಹ ಪೋಷಿಸುತ್ತಿದ್ದಾರೆ. ಈ ಸಭೆಯು ಸಂಸ್ಕೃತ ಭಾಷೆಯ ಪ್ರಸಾರಕ್ಕಾಗಿ ತನ್ನದೇ ಆದ ಪರೀಕ್ಷೆಗಳನ್ನು ಏರ್ಪಡಿಸಿ ನಡೆಸುತ್ತಾ ಬಂದಿದೆ. ಈ ಪರೀಕ್ಷೆಗಳು ಅತ್ಯಂತ ಜನಪ್ರಿಯವಾಗುತ್ತಿರುವುದನ್ನು ಗಮನಿಸಿ, ಇವುಗಳ ಪ್ರಗತಿಗಾಗಿ ಶ್ರೀ ಶ್ರೀ ಸನ್ನಿಧಾನಂಗಳವರು ಕೆಳಗೆ ಕಂಡ ವಿದ್ವಾಂಸರನ್ನೊಳಗೊಂಡ ಒಂದು ಪಠ್ಯಪುಸ್ತಕ ಸಮಿತಿಯನ್ನು ನೇಮಿಸಿರುತ್ತಾರೆ.

| | | |
|---|---|---|
| 1. | ವಿದ್ವಾನ್ ಎನ್. ರಂಗನಾಥಶರ್ಮಾ | ಅಧ್ಯಕ್ಷರು |
| 2. | ವಿದ್ವಾನ್ ಎಸ್. ವಿ. ಶಾಮಭಟ್ಟ | ಸದಸ್ಯರು |
| 3. | ವಿದ್ವಾನ್ ಶ್ರೀಧರ ಹೆಗಡೆ, ಎಂ.ಎ., ಬಿ.ಇಡಿ. | ಸದಸ್ಯರು |
| 4. | ವಿದ್ವಾನ್ ಶಂಕರಭಟ್ಟ, ಎಂ.ಎ., ಬಿ.ಇಡಿ. | ಸದಸ್ಯರು |
| 5. | ವಿದ್ವಾನ್ ಎಸ್. ಪ್ರಭಾಕರಶರ್ಮಾ, ಎಂ.ಎ., ಬಿ.ಇಡಿ | ಸದಸ್ಯರು |
| 6. | ವಿದ್ವಾನ್ ಎಂ. ಆರ್. ವೆಂಕಟೇಶಮೂರ್ತಿ | ಸದಸ್ಯರು |

ಈ ಸಮಿತಿಯವರು ಅತ್ಯಂತ ಶ್ರದ್ಧೆಯಿಂದ ಶ್ರಮವಹಿಸಿ, ಈ ಪುಸ್ತಕವನ್ನು ಪರಿಷ್ಕಾರಮಾಡಿ ಸಿದ್ಧಪಡಿಸಿಕೊಟ್ಟಿದ್ದಾರೆ. ಈ ಎಲ್ಲ ವಿದ್ವಾಂಸರಿಗೂ, ಈ ಗ್ರಂಥವನ್ನು ಅಂದವಾಗಿ ಸಕಾಲಕ್ಕೆ ಮುದ್ರಣಮಾಡಿಕೊಟ್ಟಿರುವ ಶ್ರೀ ಡಿ. ಎಸ್. ಕೃಷ್ಣಾಚಾರ್, ಪ್ರಭಾ ಮುದ್ರಣಾಲಯ, ಬೆಂಗಳೂರು – 560 004, ಅವರಿಗೂ ಕೃತಜ್ಞತಾಪೂರ್ವಕವಾದ ಧನ್ಯವಾದಗಳನ್ನು ಅರ್ಪಿಸುತ್ತೇನೆ.

ಬೆಂಗಳೂರು
ಶ್ರೀಮುಖನಾಮ ಸಂವತ್ಸರ
ಆಶ್ವಯುಜ ಶು. ಪಂಚಮೀ
20–10–1993

**ಬಿ. ಎನ್. ವಿ. ಸುಬ್ರಹ್ಮಣ್ಯಂ**
ಅಧ್ಯಕ್ಷರು
ಶ್ರೀಸುರಸರಸ್ವತೀಸಭಾ

# विषयानुक्रमणिका


| पाठः | | | पुटम् |
|---|---|---|---|
| १. | स्तोत्राणि | .... | 5 |
| २. | कालिदासः | .... | 7 |
| ३. | विक्रमस्यौदार्यम् | .... | 10 |
| ४. | आहरशुद्धौ सत्त्वशुद्धिः | .... | 13 |
| ५. | एकलव्यस्य गुरुभक्तिः | .... | 16 |
| ६. | पतिव्रतायाः माहात्म्यम् | .... | 19 |
| ७. | विकत्थनस्य मल्लस्य कथा | .... | 22 |
| ८. | श्री शङ्करभगवत्पादाः | .... | 25 |
| ९. | ब्राह्मणः सर्पश्च | .... | 28 |
| १०. | सुभाषितानि | .... | 30 |
| ११. | ब्रह्मस्तवः | .... | 34 |
| १२. | रामोदन्ते सुन्दरकाण्डः | .... | 40 |
| १३. | पञ्चतन्त्र–कथामुखम् | .... | 44 |
| १४. | चित्रग्रीवकथा | .... | 48 |
| १५. | व्याकरण विभागः | .... | 52 |
| १६. | ಸೂಕ್ತಿರತ್ನಗಳು | .... | 60 |
| १७. | शान्तिमन्त्रः | .... | 62 |
| १८. | मार्गदर्शिनी प्रश्नपत्रिका उत्तरलेखनक्रमश्च | .... | 63 |

# १. स्तोत्राणि

## (ಕಂಠಪಾಠಕ್ಕೆ)

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥ १ ॥

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
भासा कुन्देन्दुशङ्खस्फटिकमणिनिभा भासमानाऽसमाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ॥ २ ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ ३ ॥

आद्यायामिततेजसे श्रुतिपदैर्वेद्याय साध्याय ते
विद्यानन्दमयात्मने त्रिजगतः संरक्षणोद्योगिने ।
ध्येयायाखिलयोगिभिः सुरगणैर्गेयाय मायाविने
सम्यक्ताण्डवसंभ्रमाय जटिने सेयं नतिः शम्भवे ॥ ४ ॥

## व्याकरणविशेषाः

स्युः = 'अस' भुवि —इति धातोः, विधिलिङ् लकारः, प्रथमपुरुषः, बहुवचनम्

**क्रियापद रूपाणि**

| | | | |
|---|---|---|---|
| प्र. पु. | स्यात् | स्याताम् | स्युः |
| म. पु. | स्याः | स्यातम् | स्यात |
| उ. पु. | स्याम् | स्याव | स्याम |

निवसतु = "नि" इत्युपसर्गपूर्वक, 'वस' निवासे — इति धातोः लोट् लकारः, प्रथमपुरुषः, एकवचनम् ।

| | | | |
|---|---|---|---|
| प्र. पु. | वसतु, वसतात् | वसताम् | वसन्तु |
| म. पु. | वस, वसतात् | वसतम् | वसत |
| उ. पु. | वसानि | वसाव | वसाम |

वन्दे = 'वदि' अभिवादनस्तुत्योः — इति धातोः लट् लकारः, उत्तमपुरुषः, एकवचनम् । आत्मनेपदम् ।

| | | | |
|---|---|---|---|
| प्र. पु. | वन्दते | वन्देते | वन्दन्ते |
| म. पु. | वन्दसे | वन्देथे | वन्दध्वे |
| उ. पु. | वन्दे | वन्दावहे | वन्दामहे |

## अभ्यासः

1. संस्कृते उत्तरं लिखत—
   (१) गणेशं के कदा नमस्कुर्वन्ति ?
   (२) वाग्देवता स्वहस्तेषु किं किं धारयति ?
   (३) विष्णुः कथं वर्णितः ?
   (४) कीदृशाय शम्भवे नतिः ?
2. एतान् विभज्य सन्धिनाम लिखत —
   हस्तेनैकेन, देवतेयं, भासमानासमाना, लौकैकनाथम्, संरक्षणोद्योगिने, सेयम् ।
3. पर्यायपदानि लिखत —
   सुमनाः, गजाननः, वदनम्, सितः, विष्णुः, शम्भुः, भुजगः ।
4. विरुद्धपदानि लिखत —
   सुराः, सदा, शुभम्, आद्याय, उपक्रमः ।

## कठिनशब्दार्थः

सुमनसः = देवाः । सकारान्तः सुमनस् शब्दः ।

सुमनाः सुमनसौ सुमनसः ।

अक्षमाला = जपमाला । सितं पद्मम् = श्वेतकमलम् । जटिने = जटा अस्य अस्तीति जटी, तस्मै । श्रुतिपदैः = वेदमार्गैः । नतिः = नमस्कारः ।

---

# २. कालिदासः

पुरा भोजभूपालस्य सभायां अनेके कवय आसन्। तेषामेकः कालिदासो नाम। कालिदासः स्वप्रतिभया सर्वानन्यान् कवीनत्यशेत। ततो भोजराजस्य तस्मिन् महानादरः। तमेव सः कवीनां चक्रवर्तिनममन्यत। इतरे कवयस्तदसहमानाः परोक्षे भोज-भूपतिमनिन्दन्। अयं वृत्तान्तः कथञ्चित् भोजेन श्रुतः।

एकदा राजा सर्वान् कवीनाहूय 'क, ख, ग, घ' इत्येतां समस्यां दत्वा तानब्रवीत्— 'यः खल्विमां समस्यां पूरयति स एव कवीनां चक्रवर्तीति परिगण्यते' इति।

सर्वेऽपि कवयः गृहमेत्य, परित्यज्य सर्वान् व्यवहारान्, समस्या-पूरणे निरता अभूवन्, परं नैकोऽपि समस्यां पूरयितुं प्राभवत्। परेद्युः ते राजसभामागत्य म्लानमुखा अतिष्ठन्।

कालिदासस्तु सभां प्रति आगच्छन् मध्येमार्गं तालीपत्रमयं पुस्तकमेकं हस्तेन गृहीत्वा पाठशालां गच्छन्तीम् बालिकामेकां

अपश्यत्। सा च तं कविं दृष्ट्वा प्राणमत्। तेन तस्यां प्रीतः स कविः मुहूर्तं तया साकं संलपति स्म।

कालिदासः — का त्वं बाले ?

बालिका — काञ्चनमाला।

कालिदासः — कस्याः पुत्री ?

बालिका — कनकलतायाः।

कालिदासः — हस्ते किं ते ?

बालिका — तालीपत्रम्।

कालिदासः — का वा रेखा ?

बालिका — क, ख, ग, घ।

ततोऽसौ कालिदासः सभामागच्छत्। राजाऽपृच्छत् भो भोः कवयः, यदि पूरिता समस्या पठ्यताम् — सर्वे निर्वचना अधोमुखाः स्थिताः। अथ कालिदासः पीठादुत्थाय व्यजिज्ञपत् — 'राजन्, पूरिता मया समस्या'।

राजा प्राह — पठ्यताम्।

कालिदासः पठति —

का त्वं बाले ? काञ्चनमाला
कस्याः पुत्री ? कनकलतायाः।
हस्ते किं ते ? तालीपत्रम्
का वा रेखा ? क, ख, ग, घ॥

श्लोकमिमं श्रुत्वा सर्वेऽपि कवयः मात्सर्यं त्यक्त्वा, कालिदासमेव कविचक्रवर्तिनममन्यन्त।

# अभ्यासः

1. संस्कृते उत्तरं लिखत —
   १. कालिदासः कस्य सभायामासीत् ?
   २. भोजस्य कस्मिन् महानादर आसीत् ?
   ३. भोजेन का समस्या दत्ता ?
   ४. बालिकायाः हस्ते किमासीत् ?
   ५. केन समस्या पूरिता ?
2. विभज्य सन्धिनाम लिखत —
   खल्विमाम्, सर्वेऽपि, नैकोऽपि, प्राह, चक्रवर्तीति ।
3. सर्वपुरुषवचनेषु लिखत —
   अमन्यत, पठ्यताम्, अपृच्छत्, अभूत् ।
4. एभिः पदैः वाक्यानि रचयत —
   एत्य, श्रुतः, एव, अमन्यत, समस्या ।

**क्रियापद रूपाणि**

'शीङ्' स्वप्ने —लङ्, आत्मनेपदम् ।

| | | |
|---|---|---|
| अशेत | अशेयाताम् | अशेरत |
| अशेथाः | अशेयाथाम् | अशेध्वम् |
| अशयि | अशेवहि | अशेमहि |

'ब्रूञ्' व्यक्तायां वाचि — लङ्, परस्मैपदम् ।

| | | |
|---|---|---|
| अब्रवीत् | अब्रूताम् | अब्रुवन् |
| अब्रवीः | अब्रूतम् | अब्रूत |
| अब्रवम् | अब्रूव | अब्रूम |

## कठिनशब्दार्थः

एत्य = आगत्य। मध्येमार्गम् = मार्गमध्ये। संलपति = सम्भाषणं करोति। अमन्यत = अविन्दत।

---

# ३. विक्रमस्यौदार्यम्

विक्रमार्के विश्वम्भरां पालयति, योगी कश्चिदुज्जयिनीम् प्रत्यागच्छत्। स च वेदवेदाङ्गवित् सकलशास्त्रप्रवीणः। किं बहुना? स साक्षात् सर्वज्ञ एव।

एकदा विक्रमः तस्य परमां ख्यातिं निशम्य तमाह्वातुं पुरोहितं त्रिविक्रमं प्रेषयामास। स च तदन्तिकं गत्वा प्रणम्याब्रवीत्। "भोः स्वामिन्, राजा विक्रमो भवन्तं आह्वयति। तत्रागच्छतु भवान्" इति।

योगी प्राह — राजदर्शनेनास्माकं किमस्ति प्रयोजनम्

आशासीमहि भिक्षान्नं आशावासो वसीमहि।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ इति।

पुरोहितस्तदाकर्ण्य राजसमीपमागत्य तदुक्तिं न्यवेदयत्। ततो राजा स्वयमेव योगिसन्दर्शनार्थमागत्य प्रणम्य तदाज्ञया उपविष्टस्तेन सह नानाविधाध्यात्मकथाः कुर्वन् तमपृच्छत्— "भोः स्वामिन्, भवतः कति वर्षाणि जातानि?" इति।

योगी प्राह — 'किमेवं पृच्छसि? नीतिविदा पुरुषेण स्वस्यायुर्न कथनीयम्। यतः—

आयुर्वित्तं गृहच्छिद्रं मन्त्रमौषधसङ्गमौ।
दानं मानावमानौ च नव गोप्यानि कारयेत्॥

अन्यच्च, योगीश्वरेण कालं वञ्चयित्वा सुचिरं जीवितुं शक्यते। आस्तामेतत्! यदि त्वं साधयितुं प्रभवसि, तर्हि मन्त्रमेकमुपदिशामि—इति।

राजा—किं तेन लभ्येत?

योगी—तेन मन्त्रेण जरामरणवर्जितो भविष्यसि।

राजा—तर्हि, उपदिशतु भवान् कथमपि साधयामि।

ततो योगीश्वरो राज्ञे मन्त्रमुपदिश्य "अमुं मन्त्रं ब्रह्मचर्येण वर्षमेकं संजप्य अन्ते दूर्वाङ्कुरैर्होमं विधेहि। ततः पूर्णाहुतिसमये, होमकुण्डात् कश्चित् पुरुषः फलहस्तो निर्गत्य फलं दास्यति। तदुपभुज्य जरामरणवर्जितो वज्रकायो भविष्यसि" इत्युक्त्वा तमामन्त्र्य यथेच्छमगच्छत्।

राजाप्युज्जयिनीं समया हायनमेकं ब्रह्मचर्येण मन्त्रं सञ्जप्य दूर्वादलैर्हुत्वा पूर्णाहुतिमकरोत्। तावद्धोमकुण्डात् कश्चित् पुरुषो निर्गत्य दिव्यमेकं फलं राज्ञे प्रायच्छत्। राजापि तत्फलं गृहीत्वा कृतकृत्यः पुरं प्रविश्य राजमार्गे समागच्छन् कुष्टव्याधिपरिपीडितं कञ्चन विप्रमपश्यत्। स च राजानमुपसृत्य दैन्येनावदत्— "देव, राजा नाम सर्वस्य लोकस्य मातापितृवदवगन्तव्यः।

उक्तं च —

राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषाम्।
राजा पिता च माता च राजा चार्तिहरो गुरुः॥

अनेन व्याधिना मम शरीरं नश्यति। शरीरनाशात् अनुष्ठानं लुप्यते। सर्वस्यापि धर्मकार्यस्य शरीरमेव साधनम्" इति।

**राजा — किं ते मनोगतम् ? किमहं करवाणि ? निश्शङ्कं कथय ।**

**विप्रः — भगवन्, ममैतच्छरीरं यथा निरामयं अनुष्ठानयोग्यं भवेत्, तथा विधातुमर्हति भवान् ।**

**राजा तस्य वचनं श्रुत्वा तस्मै तत्फलं प्रायच्छत् । ततो भूसुरः परमतुष्यत् । इत्थम् विक्रमस्यौदार्यं लोकोत्तरमासीत् ।**

## कठिनशब्दार्थः

विश्वम्भरा = भूमिः । वेदाङ्गानि वेत्तीति = वेदाङ्गवित् । शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्यौतिषं, कल्पश्च, एतानि षट् वेदाङ्गानि । आशासीमहि = इच्छामः । आशावासः = आशा दिगेव वासः अम्बरम् । मही = भूमिः । उज्जयिनीं समया = उज्जयिन्याः समीपे । हायनः = संवत्सरः । निरामयम् = आरोग्यम् ।

## अभ्यासः

**1.** संस्कृते उत्तरं लिखत —

(१) योगी उज्जयिनीं कदा आगच्छत् ?

(२) विक्रमः योगिनमाह्वातुं कं प्रेषयामास ?

(३) गोप्यानि कानि ?

(४) अचक्षुषां चक्षुः कः ?

(५) विक्रमः फलं कस्मै प्रायच्छत् ?

**2.** ससन्दर्भं विवृणुत —

(१) स च वेदवेदाङ्गवित् ।

(२) शयीमहि महीपृष्ठे ।

(३) नीतिविदा पुरुषेण स्वस्यायुर्न कथनीयम् ।

(४) राजा चार्तिहरो गुरुः ।

(५) जरामरणवर्जितो वज्रकायो भविष्यसि ।

3. सुबन्तं, तिङन्तं, अव्ययञ्च पृथक् कुरुत —
गच्छन्, प्रत्यागच्छत्, साक्षात्, मन्त्रम्, प्राह, नीतिविदा, एकदा, कथम्, अहम्।

4. कर्तृपदं, कर्मपदं, क्रियापदञ्च विभजत —
(१) नीतिविदा स्वस्यायुर्न कथनीयम्।
(२) राजा विक्रमो भवन्तमाह्वयति।

5. एभिः पदैः वाक्यानि रचयत —
आस्ताम्, तर्हि, उपसृत्य, साधयामि।

---

# ४. आहारशुद्धौ सत्त्वशुद्धिः

विन्ध्यपर्वते कस्मिंश्चित् न्यग्रोधपादपे शुकदम्पती न्यवसताम्। तयोः रामो लक्ष्मण इति द्वौ शावकावभवताम्। एकदा व्याधः कश्चित्, जालं प्रसार्य तौ शुकौ गृहीत्वा गोदावर्यास्तीरे कस्मैचित् साधवे रामं, कस्मैचन सौनिकाय लक्ष्मणं च व्यक्रीणात्।

तावुभावपि क्रेतारौ स्वं स्वं गृहं नीत्वा तावालापयन्तौ आहारं खादयन्तौ प्रेम्णा व्यवर्धयताम्। साधुगृहे परिपुष्टो रामः शुकः साधोः मधुरैर्ललितैश्च सान्त्ववचनैः दिने दिने सुसंस्कृतोऽभूत्। अत एव स आगतान् जनान् सूक्तिभिः प्रीणयति स्म। एवमेव लक्ष्मणः शुकः सौनिकस्य गृहे तस्य परुषवचनानि श्रावं श्रावं परिचारकाणां हिंस्रं कर्म दर्शं दर्शं दिने दिने अतीव दुष्टोऽभवत्। स्वदौष्ट्यं तदा तदा परुषवचनैः प्रकटयति स्म।.

जातुचित् तौ शुकशावकौ पञ्जरबन्धनात् विमोकमिच्छन्तौ कथंचित् पञ्जरात् उद्डयेताम्। योजने दूरे विद्यमाने आम्रतरौ नीडं विरचय्य सुखेन रामः शुकः न्यवसत्। अपरस्मिन् न्यग्रोधपादपे लक्ष्मणो न्यवसत्।

एकदा कश्चिद् द्विजः गङ्गायां सिष्णासुः तेनैव मार्गेण गच्छन्, आतपेन क्लान्तः लक्ष्मणशुकेनाध्युषितस्य न्यग्रोधपादपस्य छायायां विश्रमितुकाम आगच्छत्। तं दृष्ट्वा स लक्ष्मणशुकः अन्यान् पक्षिण आहूय "अये, इह पश्यत, मानुषसङ्काशः कश्चिदायाति। तस्य चक्षुषी विदारयत। गलं भित्वा अश्नाम। सत्वरं गृह्णीत" इत्युच्चैराक्रोशत्। तं विक्रोशरवं श्रुत्वा त्रस्तो द्विजः पलायत। ततः स तत्रैव रामशुकेनाध्युषितस्य आम्रतरोः समीपमागतः। तस्य च्छायायां उपविष्टो रामः शुकः इतरान् विहङ्गमान् प्रावदत् "अये! कोऽप्यतिथिः आतपेनातीव श्रान्तः इह आगच्छति विश्रान्तिमनुभवितुम्। तरुणपल्लवान् भूमौ संस्तृणीत। यत्रायं सुखेन उपविशेत्। फलान्याहृत्य पुरो निक्षिपत। तान्यभ्यवहरतु सः। अतिथिसत्कारः श्रेयस्करः" इति।

एतच्छ्रुत्वा प्रीतो विप्रोऽपृच्छत् "अये, तस्मिन्न्यग्रोधपादपे कश्चन शुकः मां वीक्ष्य 'मारयत' 'भक्षयाम' इत्युच्चैः रौति। त्वं त्वेवं मधुरं रौषि। किमेतदि" ति।

एवं पृष्टः सोऽवदत् "अये विप्र, आवां यमलौ भ्रातरौ स्वः। अहं एकस्य साधोः सद्मनि वर्धितोऽभवम्। तत्र सर्वदा अतिथीन् उपचरन्तं साधुमपश्यम्। मधुरालापान् अशृणवम्। अतो मे बुद्धिरेवं प्रवर्तते। स शुकः एकस्य सौनिकस्य गेहे व्यवर्धत। अजान् मेषान् सूकरान् कुक्कुटांश्च हन्यमानान् अपश्यत्। परुषवचनानि चाशृणोत्। अतस्तस्य बुद्धिस्तादृशी" इति। एवं दुःशीलाः पूर्वे वयसि यां दुर्बुद्धिमधिगच्छन्ति,

**सा सदैवताननुवर्तते। वृद्धानामपि तेषां दुर्बुद्धिर्नापैति। सुबुद्धिश्च नावतरति।**

**अत एव 'सत्संगतिरावश्यकी, आहारशुद्धौ सत्त्वशुद्धिः' इति वदन्ति।**

## कठिनशब्दार्थः

शावकः = शिशुः। सत्वं = मनः। न्यग्रोधः = वटवृक्षः। सौनिकः = प्राणिवधाजीवी। श्रावं श्रावं = श्रुत्वा श्रुत्वा। दर्शं दर्शं = दृष्ट्वा दृष्ट्वा। जातु = कदाचित्। गलः = कण्ठः। सिष्णासुः = स्नानं कर्तुमिच्छुः। संस्तृणीत = विकिरत। अभ्यवहरतु = भक्षयतु।

## अभ्यासः

**1.** संस्कृते उत्तरं लिखत —

(१) शुकदम्पती कुत्र न्यवसताम्?

(२) शुकशावकयोर्नाम किम्?

(३) शावकौ काभ्यां व्यक्रीणात्?

(४) रामशुकः कुत्र न्यवसत्?

(५) लक्ष्मणशुकः कुत्र न्यवसत्?

**2.** ससन्दर्भं विवृणुत —

(१) तस्य चक्षुषी विदारयत। गलं भित्वा अश्नाम।

(२) अतिथिसत्कारः श्रेयस्करः।

**3.** अपेक्षितं रूपं लिखत —

(१) 'दृश्' धातोः लोट् मध्यमपुरुषः।

(२) 'स्था' धातोः लट् उत्तमपुरुषः।

(३) 'वस्' धातोः तुमुन्नन्तरूपम्।

4. विभज्य सन्धिनाम लिखत —

कस्मिंश्चित्, तावुभावपि, इत्युच्चैराक्रोशत्, अतस्तस्य ।

**क्रियापदम्**

'अश' भोजने — लोट् लकारः, परस्मैपदम् ।

| | | |
|---|---|---|
| अश्नातु, अश्नीतात् | अश्नीताम् | अश्नन्तु |
| अशान, अश्नीतात् | अश्नीतम् | अश्नीत |
| अश्नानि | अश्नाव | अश्नाम |

---

# ५. एकलव्यस्य गुरुभक्तिः

आसीत् द्रोणो नाम प्रथितो धनुर्वेदाचार्यः। कदाचित्तस्य धनुर्वेदकौशलं समीक्ष्य कुरुकुलपितामहः भीष्मः तं स्वनगरमानयत्। स्वपौत्रान् कौरवपाण्डवान् तस्य शिष्यान् चकार च। स च द्रोणः तान् विद्यायां परिणतान् अकरोत्। गुरुः अर्जुनस्य धनुर्वेदे परमं प्रावीण्यं वीक्ष्य अतितरां प्रीतः, अवदत् च – "अर्जुन, त्वां लोकोत्तरं धनुर्धरं करिष्यामि" इति।

द्रोणस्य कौशलं श्रुत्वा बहवो राजपुत्राः अस्त्राभ्यासाय तत्रागताः। हिरण्यधनुषो निषादराजस्य पुत्रः एकलव्योऽपि द्रोणसमीपमागतः। द्रोणः निषादकुमारमेकलव्यं शिक्षयितुमनिच्छन् अवदत्– "एकलव्य, त्वं मम शिष्योऽसि। स्वगृहे एव अस्त्रविद्यां शिक्षस्व। शरप्रयोगे बलवत्तरो भविष्यसि" इति। एकलव्यस्तु द्रोणस्य पादौ शिरसि कृत्वा स्वभवनमागतः। तत्र द्रोणस्य मृण्मयीं प्रतिमां विधाय, तां मूर्तिं सदा पूजयन् स्वयमेव अस्त्रविद्यामशिक्षत। अचिरादेव अस्त्रविद्यायां प्रावीण्यमलभत।

एकदा द्रोणस्याज्ञया कौरवपाण्डवा मृगयां कर्तुं वनमगच्छन्। तेषु मृगयां कुर्वत्सु कश्चित् सारमेयः अपरिचितमेकलव्यं दृष्ट्वा अभषत्। अनुपदमेव स भषतश्शुनो मुखे सप्तशरानपूरयत्। स श्वा शरपूर्णास्यः अर्जुनसमीपमागच्छत्। स तु तं विलोक्य विस्मितः तं शरमोचन-प्रवीणमन्विष्यन् भ्रातृभिः सह आगत्य, अविरतं शरान् प्रयुञ्जानं एकलव्यमपश्यत्। 'को भवान्?' इत्यपृच्छच्च। स तु "निषादाधिपतेः सुतः धनुर्वेदे कृतपरिश्रमः द्रोणशिष्योऽहम्" इत्यवदत्।

तदाकर्ण्य विस्मिताः सर्वे प्रतिनिवृत्य सर्वमुदन्तं द्रोणाय गुरवे निवेदयामासुः। अर्जुनस्तु रहसि द्रोणसन्निधिमागत्य "गुरो, तत्रभवता तु — 'त्वां लोकोत्तरं धनुर्धरं करिष्यामि' इत्यभिहितम्। इदानीं तु अरण्ये भवदन्तेवासी मत्तोऽपि अस्त्रविद्याकुशलतरः एकलव्यो निवसति। कथमेतत्?" इत्यपृच्छत्।

द्रोणस्तु मुहूर्तं विचार्य अर्जुनेन सह वनमगच्छत्। तत्र स्वाकृतिविराजितप्रतिमायाः पुरतः अस्त्रविद्याभ्यासनिरतं एकलव्यं अपश्यत्। स तु आयान्तं द्रोणमवलोक्य तमुपसङ्गम्य शिरसा प्रणम्य अर्घ्यपाद्यादिभिः आराधयामास। द्रोणस्तु प्रीतमनाः — 'यदि मे शिष्योऽसि तर्हि गुरुदक्षिणां देहि' इत्यब्रवीत्। 'किं प्रदास्यामि? आज्ञापयत्वाचार्यः। न हि किञ्चित् गुरवे अदेयम्' इति भक्तिनम्रः एकलव्यः प्राञ्जलिर्निवेदयामास। 'तव दक्षिणहस्ताङ्गुष्ठं गुरुदक्षिणार्थं देहि' इति द्रोणः सुदारुणमगदत्।

द्रोणस्य तादृशं वचनं श्रुत्वा आत्मनः प्रतिज्ञां रक्षन् एकलव्यो मुदा दक्षिणकराङ्गुष्ठं छित्वा द्रोणाय प्रादात्। एकलव्यस्य तादृशीं वीरभक्तिं विलोक्य सर्वे विस्मिता अभवन्। देवाश्च तस्योपरि कुसुमवृष्टिमवर्षन्। ततः स पूर्ववत् शरान् मोक्तुमसमर्थोऽभवत्।

एकमेवाक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत्।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चानृणीभवेत्॥

## कठिनशब्दार्थः

चकार = कृतवान्। प्रथितः = प्रसिद्धः। सारमेयः = शुनकः। अतितराम् = बहु। अचिरात् = शीघ्रम्। अविरतं = निरन्तरम्। आस्यं = मुखम्। निषादः = व्याधः। प्रतिकृतिः = विग्रहः। उदन्तम् = वृत्तान्तम्। द्राक् = शीघ्रं। अन्तेवासी = शिष्यः। सुदारुणम् = कठोरम्। मुदा = सन्तोषेण। अनृणी = ऋणमुक्तः।

## अभ्यासः

**1.** संस्कृते उत्तरं लिखत —

(१) द्रोणाचार्यः कः? (२) तस्य प्रसिद्धः शिष्यः कः? (३) एकलव्यः कः? (४) एकलव्यः किमर्थं द्रोणस्य समीपमागच्छत्? (५) द्रोणः तस्मै किमुत्तरं प्रायच्छत्?

**2.** ससन्दर्भं विवृणुत —

(१) शरप्रयोगे बलवत्तरः भविष्यसि। (२) त्वां लोकोत्तरं धनुर्धरं करिष्यामि। (३) न हि किञ्चित् गुरवे अदेयम्।

**3.** पर्यायपदानि लिखत —

कोविदः, प्रथितः, अन्तिकम्, प्रतिकृतिः, सारमेयः, आस्यम्।

**4.** दोषान् परिहरत —

(१) भवान् गच्छ। (२) द्रोणस्य सह अर्जुनः अगच्छत्।

(३) ग्रामस्य समया उपवनं अस्ति।

---

# ६. पतिव्रतायाः माहात्म्यम्

आसीत् कश्चित् द्विजातिप्रवरः कौशिको नाम साङ्गवेदाध्यायी। स च धर्मशीलः, तपोनिष्ठश्चासीत्। एकदा सः कस्मिंश्चिद्वृक्षमूले वेदान् पठन् स्थितः। तस्य वृक्षस्योपरिष्टात् काचिद्बलाका स्थिता। तया ब्राह्मणस्योपरि पुरीषमुत्सृष्टम्। तदा क्रुद्धः स द्विजः बलाकामुग्रदृष्ट्याऽपश्यत्। अनुपदमेव सा गतसत्वाऽचेतना धरणीतले न्यपतत्। ततः कारुण्यादभिसन्तप्तः द्विजः 'अकार्यं कृतवानस्मि' इति पर्यशोचत्।

अनन्तरं स कौशिकः भैक्ष्याय कञ्चिद्ग्राममगच्छत्। तत्र कस्याश्चिद् गृहिण्याः सदनमेत्य 'भवति, भिक्षां देहि' इत्ययाचत। गृहिणी ब्राह्मणं दृष्ट्वा 'तिष्ठे' त्युक्तवती। एतस्मिन्नन्तरे तस्याः भर्ता क्षुधासंपीडितः सहसा गृहं प्रविष्टः। सा साध्वी पतिमागतं दृष्ट्वा ब्राह्मणं विहाय पतिसेवानिरताऽभवत्। पाद्यार्घ्यादिभिः मधुरैर्भक्ष्यभोज्यैश्च पतिदेवमतोषयत्। कर्मणा मनसा वाचा भर्तुश्चित्तानुसारिणी सा पतिं दैवतं मेने। सा साध्वी नित्यं संयतेन्द्रिया देवतातिथिभृत्यानां तथा श्वश्रूश्वशुरयोः शुश्रूषणपरा आसीत्। एवं पतिशुश्रूषां कुर्वती सा भैक्ष्यकाङ्क्षिणं द्वारि संस्थितं ब्राह्मणं सहसाऽस्मरत्। अनुपदमेव सा साध्वी विप्राय भिक्षामादाय निरगच्छत्।

तावत्क्रोधसन्तप्तं तेजसा ज्वलन्तमिव स्थितं भूसुरं दृष्ट्वा सा पतिव्रता सान्त्वपूर्वं वचोऽब्रवीत्। 'भो विप्रेन्द्र, क्षन्तुमर्हसि। भर्ता मे महद्दैवतम्। स चापि क्षुधितः श्रान्तः प्राप्तः। एतावत्पर्यन्तं मया स शुश्रूषितः। इदानीं तव सेवायै अहमागता' इति।

ब्राह्मण उवाच – 'अतिथिभ्योऽपि तव पतिरेव गरीयानिति मन्यसे। गृहस्थधर्मे वर्तमाना त्वं मामवमन्यसे। अग्निसदृशाः द्विजाः पृथिवीमपि

दहेयुरिति अवलिप्ता त्वं न जानासि' इत्युक्त्वा रोषारुणितदृष्ट्या तां दहन्निवापश्यत्। तदा सा साध्वी अवदत् — 'भो विप्र, नाहं बलाका। अनया क्रुद्धया दृष्ट्या मां किं करिष्यसि? क्रोधं संहर। देवैस्तुल्यान् मनस्विनो विप्रान् नावजानाम्यहम्। किं तु पतिव्रतायाः पतिरेव पूज्यतमः' इत्येव जानामि। भो विप्र, ममापराधमिमं क्षन्तुमर्हसि। धीमतां विप्राणां तेजः माहात्म्यं च जानामि। दैवतेष्वपि सर्वेषु भर्ता मे परं दैवतम्। भर्तुः शुश्रूषायाः फलं मे पश्य। त्वया रोषात् बलाका दग्धा। पातिव्रत्येन तन्मया विदितम्। भो द्विजोत्तम, मनुष्याणां क्रोधः शरीरस्थो रिपुः। स त्वया न निर्जितः। जितेन्द्रियः, धर्मपरः, स्वाध्यायनिरतः, शुचिरपि यः कामक्रोधौ न वशयेत् स न ब्राह्मणः। अतस्त्वं क्रोधं त्यज।

'अपि च भगवन्, त्वं तत्त्वेन धर्मं न वेत्सि। त्वं मिथिलानगरीं गत्वा धर्मव्याधमुपसृत्य धर्मस्य तत्त्वं पृच्छ। मातापितृशुश्रूषणे रतः सत्यवादी जितेन्द्रियः स धर्मव्याधः ते धर्मान् प्रवक्ष्यति। मम सर्वमत्युक्तमपि क्षन्तुमर्हसि' इति।

एवं पतिव्रतायाः विनम्रवचनं श्रुत्वा गतक्रोधः द्विजोत्तमः कौशिकः तस्याः आतिथ्यं स्वीकृत्य स्वस्तीत्युक्त्वा धर्मव्याधं प्रष्टुं मिथिला-नगरमगच्छत्।

अहो पतिव्रतायाः माहात्म्यम्!

## कठिनशब्दार्थः

साङ्गवेदाध्यायी = षडङ्गसहितं वेदाध्ययनं यः कृतवान् सः। बलाका = श्वेतपक्षिविशेषः। पुरीषं = गूथम्। अनुपदं = तत्क्षणम्। सदनम् = गृहम्। अवलिप्ता = गर्विष्ठा। एत्य = आगत्य। अत्युक्तम् = विपरीतं वचनम्।

# अभ्यासः

1. संस्कृते उत्तरं लिखत —

(१) कौशिकः कीदृशो द्विज आसीत् ? (२) वृक्षस्योपरि का स्थिता ? (३) कौशिकः पक्षिणं कुतः क्रूरया दृष्ट्या अपश्यत् ? (४) गृहिणी द्विजं किमवदत् ? (५) धर्मव्याधः कुत्र न्यवसत् ?

2. ससन्दर्भं विवृणुत —

(१) अकार्यं कृतवानस्मि । (२) भवति, भिक्षां देहि । (३) अग्निसदृशाः द्विजाः पृथिवीमपि दहेयुः । (४) भो विप्र, नाहं बलाका । (५) मनुष्याणां शरीरस्थो रिपुः क्रोधः ।

3. (१) शब्दस्वरूपं निर्दिशत —

पूरयन्, स्थिता, एत्य, कर्मणा, संहर ।

(२) पर्यायपदानि लिखत —

द्विजः, धरणी, साध्वी, भर्ता, शुश्रूषा, अनुपदम् ।

(३) कर्तृ — कर्म — क्रियावाचकपदानि विभजत —

(१) अकार्यं कृतवानस्मि ।
(२) त्वं पाठं पठ ।
(३) मया स शुश्रूषितः ।

# ७. विकत्थनस्य मल्लस्य कथा

वागाडम्बरवान् लोके न किञ्चित्कर्तुमर्हति ।
गर्जद्घना न वर्षन्ति न गर्जन्ति घनाघनाः ॥

पुरा वज्रजङ्घो नाम मल्लोऽविद्यत । सः मितविद्यतया कुत्रापि जीवनं सम्यगलभमानः मलयालदेशाधिपतेः सुन्दराभिधस्य समीपमाससाद । महाराजं प्रणिपत्य विज्ञापयति स्म । स्वामिन्, 'खुरलीविद्यायां समर्थोऽहं तव समीपे वस्तुमागतोऽस्मि । तव पुत्रान् खुरलीविद्यानिपुणान् कुर्याम् । महावीरान् मल्लान् शतमप्येकदैव जयेयम् । पर्वतानपि शिरसा वहेयम् । महाव्याघ्रानपि निगृह्णीयाम्' इति ।

तच्छ्रुत्वा राजा सुतरां विसिष्मिये । तावदेव नगराध्यक्षस्समागत्य राजानं प्रणिपत्यावदत् । "महास्वामिन्, नगरान्नातिदूरवर्तिनि पर्वते व्याघ्रादयो दुष्टसत्त्वास्समवेतास्सन्तः पौरान् बहुधा बाधन्ते । पौरास्तु 'अये ! पर्वतसमीपे इदं पुरं वर्तते, अत्र स्थित्या वयं निहता' इति प्रतिगृहं क्रोशन्ति"इति विज्ञापयामास ।

राजा किञ्चिदालोच्य 'अयि मल्लाग्रेसर, पर्वतानपि वहेयमित्यवदः किल, इमं गिरिं शिरसा धृत्वा दूरं नेतुं शक्नोषि किम्' ? इत्यपृच्छत् । स मल्लस्तु 'अहो किञ्चित्कालपर्यन्तं सुखभोजनं प्राप्तुमुपायः प्राप्तः; तदनन्तरं यद्भावि तद्भवतु' इत्यालोच्य 'स्वामिन्, पर्वतद्वयमपि भुजाभ्यां धृतवतो मे जिह्वा एकं पर्वतं शिरसा वहेयमिति स्वामिसन्निधौ विज्ञापयितुं जिह्रेति' इत्यकथयत् । राजा तु 'तर्हि त्वरस्वे' त्युवाच ।

तच्छ्रुत्वा स पुनः प्रणम्य "स्वामिन्, बहुदिनादारभ्य एतादृशकार्या-भावात् मम तत्पाटवं किञ्चित्कुण्ठितमिवास्ते, तस्मादेकसंवत्सरपर्यन्तं

अवधिः प्रदीयते चेत् अनुरूपाहारादिना देहं दृढीकृत्य एतत्कार्यं निर्वर्तयिष्यामि" 'इत्यकथयत्। तदाकर्ण्य स नृपतिः तथैव भवत्वित्यङ्गीकृत्य तावत्पर्यन्तं तुभ्यं किं देयमित्यवदत्।

स तु प्रतिदिनमेकैकं निष्कं दीयते चेत् तदेवालमिति न्यवेदयत्। राजा तथैवादापयत्। स तदा प्रभृति दिने दिने मृष्टान्नादिकं भोजं भोजं मदगजायते स्म। ततस्संवत्सरे पूर्णे राजानं प्रति 'स्वामिन्, अस्मिन् दिने गिरिं वहामि, तत्रभवद्भिस्संनिहितैर्भवितव्यम्' इत्यब्रवीत्।

राजा नितरां प्रहृष्य सपरिवारस्तं प्रदेशमगात्। एतद्वृत्तान्तं कर्णाकर्णिकया श्रुत्वा तद्दिदृक्षवः पौरा जानपदाः ग्रामीणाश्च समागच्छन्। तावदयं परिकरं दृढं बध्वा भुजावास्फाल्य राजानं प्रति 'स्वामिन्, उर्वीधरं वोढुं सन्नद्धोऽस्मि, आज्ञाप्यन्तां सैनिकाः पर्वतमुद्धृत्य मच्छिरसि निधातुम्, ' इत्यवादीत्।

तदा राजा विस्मित्य 'कथमिमे गिरिमुद्धर्तुं शक्नुयुः ?' इत्यवदत्। मल्लस्तु 'स्वामिन्, अहं मत्प्रतिज्ञानुरूपं शिरसा गिरिं वोढुं समर्थोऽस्मि। किन्तु गिरिरयं कैश्चित् मच्छिरसि निधेयः। आरोपितं गिरिमन्यत्र नयामि' इत्यवदत्। सर्वेऽपि चमत्कृताः। राजा निरुत्तरः सन् मल्लस्य कौशलं प्राशंसत्।

निरालम्बो वाग्डम्बरो न विश्वसनीयः ॥

## कठिनशब्दार्थः

विकत्थनः = वृथाभिमानी। घनाघनाः = वृष्टिदाः मेघाः। खुरलीविद्या = मल्लयुद्धशिक्षणम्। विसिष्मिये = आश्चर्यचकितोऽभूत्। समवेताः = आगताः। जिह्रेति = लज्जते। निष्कम् = नाणकम्। भोजं भोजं = भुक्त्वा, भुक्त्वा। उर्वीधरः = पर्वतः। परिकरः = कटिबन्धनसाधनम्। सन्नद्धः = सिद्धः।

## अभ्यासः

**1.** संस्कृते उत्तरं लिखत —

१. कीदृशः पुरुषः न किञ्चित्कर्तुमर्हति ?

२. मल्लस्य नाम किम् ?

३. सः कस्य सभामाससाद ?

४. मल्लस्य सामर्थ्यं विशदयत ।

५. मल्लः परिकरं बध्वा राजानं किमुवाच ?

**2.** संयुज्य सन्धिनाम लिखत —

गर्जत् + घनाः । मल्लः + अविद्यत । तत् + श्रुत्वा ।
अपि + एकदा + एव । गिरिः + अयम् ।

**3.** ससन्दर्भं लिखत —

१. अत्र स्थिताः वयं निहताः ।

२. तदनन्तरं यद्भावि तद्भवतु ।

३. तत्रभवद्भिः सन्निहितैर्भवितव्यम् ।

४. "कथमिमे गिरिमुद्धर्तुं शक्नुयुः" ?

**4.** एषां अनुरूपाणि प्रश्नवाक्यानि रचयत —

१. मल्लस्य नाम वज्रजङ्घ इति ।

२. महाव्याघ्रानपि निगृह्णीयाम् ।

३. उर्वीधरं वोढुं सन्नद्धोऽस्मि ।

# ८. श्री शङ्करभगवत्पादाः

अहो, आश्चर्यपरम्परा केयम् ?

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।।

क एते महामुनयः ?

एते शङ्करभगवत्पादाः परमहंसपरिव्राजकाचार्याः ।

जगद्गुरुः शङ्कराचार्यः केरलेषु पूर्णानद्यास्तटे विद्यमानं कालटिनामकं ग्रामं स्वजन्मना अलञ्चकार। तस्य पिता परमभागवतः शिवगुरुः। जननी च धर्मशीला सती आर्याम्बा। सोऽयमाचार्यः ७८८ तमे क्रिस्ताब्दे नन्दनसंवत्सरे वैशाखशुक्ल पञ्चम्यां तिथौ शुभे मुहूर्ते अवातरत्।

स यदा तृतीयहायनोऽभवत् तदा तस्य पिता दुर्दैवात् कालवशं गतः। जननी आर्याम्बा पत्युर्वियोगेन खिन्नापि महातेजस्विशिशुरक्षणे बद्धादराभवत्। पञ्चमवत्सरे बन्धुभिस्तस्योपनयनं कारयामास। अनुपदमेव गुरुकुलमुपनीतः स वटुः द्वित्रैरेव वर्षैः सर्वान् वेदान्, वेदाङ्गानि, विविधा भाषाश्च अधीतवान्। अधीत्य च सर्वाणि शास्त्राणि, अष्टहायनः कुमारः जगदिदं परिदृश्यमानं मृगतृष्णिकाकल्पमिति निश्चित्य, सर्वसंन्यासे दृढमतिरभूत्। तदेकपुत्रा माता तस्येच्छां नान्वमन्यत। अथापि स कथंचित् तस्याः सम्मतिमवाप्य, गृहं परित्यज्याव्रजत् सद्गुरुं गवेषयमाणः।

नर्मदातीरे गुहायां तपस्यन्तं मस्करीन्द्रं गोविन्दभगवत्पादं शरणमुपगम्य, तस्मात् संन्यासदीक्षामधिगत्य तस्यैव समीपे

वेदान्तमध्यैत। अल्पीयसैव कालेन शिष्यस्य प्रतिभया विस्मितो गुरुः अमुं शिष्यं भगवतः शङ्करस्यावतारं मत्वा पाखण्डैरभिभूयमानस्य सनातनधर्मस्य परिपालनायादिशत्।

शिरसा वहन् गुरोराज्ञां शङ्कराचार्यः वाराणसीं गत्वा भाष्यग्रन्थचयान् विरचय्य, अपरिमितानन्तेवासिनः सङ्गृह्य, तैस्सह पादचारेण पुण्यक्षेत्रेषु सञ्चरन्, तत्रत्यैर्महाविद्वद्भिः साकं सुदीर्घकालं वादं कृत्वा स्वमतमद्वैतं लोके प्रचारयामास। आवर्जयामास च मधुरमधुरया वाग्धोरण्या जनतायाश्चेतांसि। खण्डयामास च विरुद्धानि पाखण्डमतानि। रचयामास च हृद्यया शैल्या परश्शतान् ग्रन्थान्। अध्यापयामास च नानादिग्भ्यः समागतान् परःसहस्रान् शिष्यान्। तेषु प्रधानभूताः—पद्मपादाचार्यः, सुरेश्वराचार्यः, हस्तामलकाचार्यः, त्रोटकाचार्यः इति चत्वारः शिष्याः।

तदनु श्रीदेशिकेन्द्रः महता यत्नेनोज्जीवितस्य सद्धर्मस्य स्थिरप्रतिष्ठार्थं उदीच्यां दिशि बदर्यां ज्योतिर्मठे त्रोटकाचार्यं, पूर्वस्यां जगन्नाथे गोवर्धनमठे पद्मपादं, प्रतीच्यां द्वारकायां शारदामठे हस्तामलकं, दक्षिणस्यां शृङ्गेर्यां सुरेश्वराचार्यं च, सनातनधर्मोज्जीवनाय नियोज्य, अल्पीयसैव कालेनासेतुहिमाचलं स्वीयं नित्यं शुद्धं यशो विस्तार्य आयुषो द्वात्रिंशे वर्षे केदारनाथक्षेत्रे समाधिमास्थाय परंधाम प्रपेदे। अद्यतना अप्याचार्याः धर्मसंस्थापनाय देशाद्देशं व्रजन्तः शिष्याननुपदिशन्तः अधर्ममुच्चाटयन्तो वैदिकधर्ममहर्निशं श्रद्धया परिपालयन्ति।

॥ नमो गुरुभ्यः ॥

## कठिनशब्दार्थः

अभ्यगात् = निरगच्छत्। परमहंसपरिव्राजकाचार्याः = परमश्रेष्ठयतिनः। हायनः = संवत्सरः। मृगतृष्णिकाकल्पम् = मृगमरिचिकासमानम्। द्वित्रैः = द्वौ वा त्रयो वा तैः। गवषयमाणः = अन्विष्यन्। मस्करीन्द्रः = यतिवर्यः। अध्यैत् = अध्ययनं कृतवान्। अभिभूयमानः = तिरस्कृतः।

## अभ्यासः

1. संस्कृते उत्तरं लिखत —

१. कालटिग्रामः कुत्राऽस्ति ? २. शङ्कराचार्यः कदा अवातरत् ? ३. शङ्कराचार्यस्य मातापितरौ कौ ? ४. तस्य प्रसिद्धाः शिष्याः के ? ५. कुत्र कुत्र तैः मठाः स्थापिताः ? कुतः ?

2. सन्धि विगृह्य नाम लिखत —

केयम्, जगद्गुरुः, पत्युर्वियोगेन, मतिरभूत्, नान्वमन्यत।

3. संयोज्य लिखत —

| अ | आ |
|---|---|
| गवेषयमाणः | अव्ययम् |
| अवातरत् | ल्यबन्ताव्ययम् |
| अधीत्य | तिङन्तः |
| अनुपदम् | वर्तमानकृदन्तः |

क्रियापदम् — कारयामास लिट् लकारः। कृञ् धातुः णिजन्तः।

| | | |
|---|---|---|
| कारयामास | कारयामासतुः | कारयामासुः |
| कारयामासिथ | कारयामासथुः | कारयामास |
| कारयामास | कारयामासिव | कारयामासिम |

# ९. ब्राह्मणः सर्पश्च

अस्ति कस्मिंश्चिदधिष्ठाने हरिदत्तो नाम ब्राह्मणः। तस्य च कृषिं कुर्वतोऽपि समीचीनं फलमलभमानस्य कालोऽतिवर्तते। अथ एकस्मिन् दिवसे स ब्राह्मणः चिन्ताग्रस्तः उष्णकालावसाने घर्मार्तः स्वक्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तोऽनतिदूरे वल्मीकोपरि प्रसारितबृहत्फटाटोपभीषणं भुजङ्गमं दृष्ट्वा चिन्तयामास – "नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता। तेनेदं मे कृषिकर्म विफलीभवति। तदस्या अहं पूजामद्य करिष्यामि।"

इत्यवधार्य, कुतोऽपि क्षीरं याचित्वा शरावे निक्षिप्य वल्मीकान्तिकमुपगत्योवाच–

"भोः क्षेत्रपाल! मया एतावन्तं कालं न ज्ञातं यत्त्वमत्र वससि, तेन पूजा न कृता। तत्साम्प्रतं क्षमस्व" इति। एवमुक्त्वा दुग्धञ्च निवेद्य गृहाऽभिमुखं प्रायात्। अथ प्रातर्यावदागत्य पश्यति तावद्दीनारकमेकं शरावे दृष्टवान्। एवञ्च प्रतिदिनमेकाकी समागत्य तस्मै क्षीरं ददाति, एकैकञ्च दीनारं गृह्णाति।

अथैकस्मिन् दिवसे वल्मीके क्षीरनयनाय पुत्रं नियुज्य ब्राह्मणो ग्रामान्तरं जगाम। पुत्रोऽपि क्षीरं तत्र नीत्वा संस्थाप्य च पुनर्गृहं समायातः। दिनान्तरे तत्र गत्वा दिनारकमेकं च दृष्ट्वा गृहीत्वा च चिन्तितवान् – "नूनं सौवर्णदीनारपूर्णो वल्मीकः। तदेनं हत्वा सर्वमेकवारं ग्रहीष्यामि"। इत्येवं सम्प्रधार्याऽन्येद्युः क्षीरं ददता ब्राह्मणपुत्रेण सर्पो लगुडेन शिरसि ताडितः। ततः कथमपि दैववशात् अमुक्तजीवित एव सर्पः रोषात्तमेव तीव्रविषदशनैस्तथाऽदशत यथा स सद्यः पञ्चत्वमुपागतः। स्वजनैश्च नातिदूरे क्षेत्रस्य काष्ठसञ्चयैः संस्कृतः।

**अथ द्वितीयदिने तस्य पिता समायातः। स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा मत्पुत्रेण स्वकर्मणः फलं अनुभूतम्। सर्पेण युक्तमेव कृतमिति मन्यमानोऽपि सुतविनाशात् दुःखमनुभूतवान्।**

## कठिनशब्दार्थः

अतिवर्तते = येन केन प्रकारेण कालः गच्छति। उष्णकालावसाने = समाप्तप्राये ग्रीष्मकाले। घर्मार्तः = धर्मेण पीडितः। दीनारकं = निष्कम्। पञ्चत्वमुपगतः = मृतः। काष्ठसञ्चयैः = काष्ठराशिभिः।

## अभ्यासः

**1.** संस्कृते उत्तरं लिखत —

(१) कृषिं कुर्वतः ब्राह्मणस्य कालः कथं अतिवर्तते ?

(२) वृक्षच्छायायां प्रसुप्तः ब्राह्मणः किं दृष्टवान् ?

(३) ब्राह्मणः ग्रामान्तरगमनसमये सर्पपूजां कर्तुं कं नियोजयामास ?

(४) ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?

(५) भुजङ्गमः रोषात् किमकरोत् ? परिणामः किमभवत् ?

(६) ब्राह्मणः स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा किममन्यत ?

**2.** ससन्दर्भं लिखत —

(१)"नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता"। (२) "तदेनं हत्वा सर्वमेकवारं ग्रहीष्यामि"। (३) "सर्पेण युक्तमेव कृतम्"।

**3.** पर्यायपदानि लिखत —

क्षीरं, भुजङ्गमः, अन्तिकम्, गृहम् ।

**4.** विभज्य सन्धिनाम लिखत —

अथैकस्मिन्, कदाचिदपि, तेनेदं, अब्रवीच्च, प्रसुप्तोऽनतिदूरे ।

**5.** प्रयोगपरिवर्तनं कुरुत —

(१) तेन पूजा न कृता ।

(२) ब्राह्मणपुत्रेण सर्पः लगुडेन शिरसि ताडितः ।

(३) मत्पुत्रः स्वकर्मणः फलं अनुभूतवान् ।

---

# १०. सुभाषितानि

प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेला नराणाम् ।
ददति जलमनल्पास्वादमाजीवितान्तम्
न हि कृतमुपकारं साधवो विस्मरन्ति ॥ १ ॥

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ॥ २ ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥ ३ ॥

राजा घृणी ब्राह्मणः सर्वभक्षी
स्त्री चात्रपा दुष्टमतिः सहायः ।
प्रेष्यः प्रतीपोऽधिकृतः प्रमादी
त्याज्या अमी यश्च कृतं न वेत्ति ॥ ४ ॥

विद्यया विमलयाऽप्यलङ्कृतो
दुर्जनः सदसि माऽस्तु कश्चन ।
साक्षरा हि विपरीततां गताः
केवलं जगति तेऽपि राक्षसाः ॥ ५ ॥

पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान्
रामेणापि कथं न हेमहरिणस्यासम्भवो लक्षितः ।
अक्षैश्चापि युधिष्ठिरेण सहसा प्राप्तो ह्यनर्थः कथं
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ॥ ६ ॥

रविनिशाकरयोर्ग्रहपीडनं
गजभुजङ्गविहङ्गमबन्धनम् ।
मतिमतां च विलोक्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥ ७ ॥

सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखम् ।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ॥ ८ ॥

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति तेषां यशःकाये जरामरणजं भयम् ॥ ९ ॥

यथा कन्दुकपातेनोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ॥ १० ॥

## कठिनशब्दार्थः

1. निहितभाराः = धृतभाराः । ददति = यच्छन्ति । आजीवितान्तं = जीवनपर्यन्तम् । न हि विस्मरन्ति = उपकारं सदा स्मरन्त्येवेत्यर्थः ।

2. प्रत्यहं = प्रतिदिनम् । तुल्यं = समानम् ।
3. न्याय्यात् = न्यायादनपेतात् । धीराः = विचक्षणाः ।
4. घृणी = दयालुः । अत्रपा = लज्जारहिता । प्रेष्यः = दूतः । प्रतीपः = विपरीतकारी । अधिकृतः = अधिकारी ।
5. दुर्जनः = दुष्टः । सदसि = सभायाम् ।
6. पौलस्त्यः =रावणः । हेम =कनकम् । अक्षैः =द्यूतैः । सहसा =तूर्णं । प्रत्यासन्नविपत्तिमूढमनसां = आसन्नापत्कालेन मूढ-चिन्तानाम् ।
7. मतिमतां = सुधियाम् । विधिः = भाग्यम् । मतिः = बुद्धिः ।
8. कुतः = कस्मात्
9. जयन्ति = 'जि' जये—लट्, प्र.पु. बहुवचनम् । रससिद्धाः = रसेषु सिद्धाः । कवीश्वराः = कवीनां ईश्वराः । यशः एव कायः, तस्मिन् = यशःकाये । जरामरणजम् = जरामरणाभ्यां जातम् ।
10. कन्दुकपातेन = कन्दुकस्य पातः, तेन । उत्पतति = (उत्) पत्लृ गतौ – लट् । मृत्पिण्डपतनं = मृत्पिण्डस्य पतनम् ।

## अभ्यासः

1. संस्कृते उत्तरं लिखत —

(१) कृतमुपकारं के न विस्मरन्ति ? (२) नरः आत्मनश्चरितं प्रत्यहं कथं प्रत्यवेक्षेत ? (३) धीराः कस्मात् पदं न प्रविचलन्ति ? (४) के के त्याज्याः ? (५) राक्षसाः के ? (६) केषां मतिः क्षीयते ? (७) केषां बन्धनं भवति ? (८) विद्यार्थी चेत् किं त्यजेत् ? (९) के जयन्ति ? (१०) कथं अनार्यः पतति ?

2. ससन्दर्भं विवृणुत —

(१) "केवलं जगति तेऽपि राक्षसाः" (२) "विधिरहो बलवानिति मे मतिः।" (३) "कुतो विद्यार्थिनः सुखम्।" (४) प्रत्यासन्नविपत्ति-मूढमनसां प्रायो मतिः क्षीयते।"

3. सर्वपुरुषवचनेषु लिखत —

ददाति, अस्तु, वेत्ति, क्षीयते, स्तौतु, निन्दतु।

4. पर्यायपदानि लिखत —

घृणी, मतिः, विहङ्गमः, गजः तोयं, यशः।

5. रिक्तस्थानानि पूरयत —

(१) शिरसि ------ नारिकेला ------। (२) प्रत्यहं ------ नरः ------ आत्मनः। (३) स्त्री च ------ दुष्टमतिः ------ । (४) ------ त्यजेद्विद्यां विद्यार्थी वा ------। (५) पौलस्त्यः कथं ------ दोषं न ------ ।

**क्रियापद रूपाणि**

1. प्रति + अव + ईक्ष्—विधिलिङ् लकारः (प्रत्यवेक्षेत)

| | | |
|---|---|---|
| ईक्षेत | ईक्षेयाताम् | ईक्षेरन् |
| ईक्षेथाः | ईक्षेयाथाम् | ईक्षेध्वम् |
| ईक्षेय | ईक्षेवहि | ईक्षेमहि |

2. निन्द् धातुः लोट् लकारः। (निन्दन्तु)

| | | |
|---|---|---|
| निन्दतु, निन्दतात् | निन्दताम् | निन्दन्तु |
| निन्द, निन्दतात् | निन्दतम् | निन्दत |
| निन्दानि | निन्दाव | निन्दाम |

3. स्तु धातुः लोट् लकारः (स्तुवन्तु)

| | | |
|---|---|---|
| स्तौतु, स्तुतात् | स्तुताम् | स्तुवन्तु |
| स्तुहि, स्तुतात् | स्तुतम् | स्तुत |
| स्तवानि | स्तवाव | स्तवाम |

4. विद् धातुः लट् लकारः (वेत्ति)

| | | |
|---|---|---|
| वेत्ति | वित्तः | विदन्ति |
| वेत्सि | वित्थः | वित्थ |
| वेद्मि | विद्वः | विद्मः |

5. क्षि धातुः लट् लकारः

| | | |
|---|---|---|
| क्षीयते | क्षीयेते | क्षीयन्ते |
| क्षीयसे | क्षीयेथे | क्षीयध्वे |
| क्षीये | क्षीयावहे | क्षीयामहे |

---

# ११. ब्रह्मस्तवः

अयं पठ्यभागः महाकविकालिदासविरचितस्य कुमारसम्भव-नामक महाकाव्यस्य द्वितीयसर्गात् उद्धृतः।

पार्वत्याः शङ्करसेवासमये तारकासुरपरिभवमसहमानाः इन्द्रादयो देवाः तन्निवेदनाय ब्रह्मणः सद्म प्रपेदिरे। तत्र ते सर्वे देवाः चतुर्मुखं ब्रह्माणं प्रणम्य "त्वमेव सर्वस्य कारणम्" इति यथार्थभूताभिः वाग्भिः स्तोतुं समुपचक्रिरे।

तस्मिन्विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः ॥ १ ॥

तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियम् ।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ॥ २ ॥

अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥ ३ ॥

नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥ ४ ॥

यदमोघमपामन्तरुप्तं बीजमज ! त्वया ।
अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे ॥ ५ ॥

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥ ६ ॥

स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया ।
प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ ॥ ७ ॥

स्वकालपरिमाणेन व्यस्तरात्रिन्दिवस्य ते ।
यौ तु स्वप्नाऽवबोधौ तौ भूतानां प्रलयोदयौ ॥ ८ ॥

जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥ ९ ॥

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥ १० ॥

द्रवः सङ्घातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥ ११ ॥

उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम् ॥ १२ ॥

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम्।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ॥ १३ ॥

त्वं पितॄणामपि पिता देवानामपि देवता।
परतोऽपि परश्चासि विधाता वेधसामपि ॥ १४ ॥

त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः।
वेद्यं च वेदिता चासि ध्याता ध्येयं च यत्परम् ॥ १५ ॥

## व्याकरणविशेषाः

1. द्यो शब्दस्थाने दिवादेशः। द्यौः ओकः येषां ते = दिवौकसः। दिवशब्दः अकारान्तोऽप्यस्ति। स्वयंभुव इदं = स्वायम्भुवं तत्। 'तस्येदं' इत्यण्। धाम = स्थानं।
2. सुप्तानि पद्मानि येषु तानि सुप्तपद्मानि, तेषां =सुप्तपद्मानां। प्रशस्ताः दीधितयः सन्ति अस्य इति दीधितिमान्। प्राशस्त्ये मतुप्प्रत्ययः।
3. वाचाम् ईशः =वागीशः तं वागीशम्। उपतस्थिरे = उपोपसर्गपूर्वकात् 'ष्ठा गतिनिवृत्तौ' इति धातोः लिट्। 'उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम् 'इति वार्तिकेन आत्मनेपदम्।
4. तिस्रः मूर्तयः यस्य सः त्रिमूर्तिः तस्मै त्रिमूर्तये। तुभ्यं नमः = 'नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च' इति चतुर्थी।

5. चरन्तीति चराः, न चराः अचराः, चराश्च अचराश्च एषां समाहारः चराचरं, समाहारे द्वन्द्वैकवद्भावः ।

6. स्रष्टुमिच्छा सिसृक्षा, तया सिसृक्षया ।

7. रात्रौ च दिवा च रात्रिन्दिवम् । व्यस्तं विभक्तं रात्रिन्दिवं यस्य सः, तस्य व्यस्तरात्रिन्दिवस्य ।

8. अविद्यमानः आदिः यस्य सः अनादिः ।
न विद्यते योनिः यस्य सः अयोनिः ।

9. प्रकामस्य भावः प्राकाम्यं, ष्यञ् प्रत्ययः ।

10. न्यायैः = नीयन्ते एभिः अर्थविशेषाः इति न्यायाः = स्वराः तैः । प्रभवः = प्रभवति अस्मादिति प्रभवः कारणम् ।

11. परतः = पञ्चम्यर्थे तसिल्प्रत्ययः ।
वेधसाम् =अत्र योगेन सृष्टिकर्तॄणामित्यर्थः । विदधतीति वेधसः, तेषां ।

12. हव्यं = हूयते यत् तत् हव्यं ।

## कठिनशब्दार्थः

1. दिवौकसः = देवाः । तुराषाट् = इन्द्रः ।
तुराषाट्—तुरासाहौ—तुरासाहः । धाम =स्थानम् । ययुः = जग्मुः ।

2. ब्रह्मा = पितामहः । सरसां = कासाराणां । आविरभूत् = प्रादुरभूत् ।

3. धातारं=स्रष्टारम् । प्रणिपत्य=नमस्कृत्य । उपतस्थिरे = तुष्टुवुः ।

4. प्राक् = पूर्वं । भेदम् = उपाधिम्, स्रष्टृत्वादिकमित्यर्थः । उपेयुषे = प्राप्तवते ।

5. अमोघम् = अवन्ध्यं सफलमित्यर्थः। गीयसे = अभिधीयसे।
6. अवस्थाभिः = दशाभिः। कारणतां = उपादानादिहेतुतां।
7. भिन्नमूर्तेः = भिन्नकायस्य, द्विधाकृतवपुषः। आत्मभागौ = देहांशौ। स्त्री च पुमांश्च = स्त्रीपुंसौ। "अचतुरविचतुर ........." इति अच् प्रत्ययान्तो निपातः।
8. स्वकालपरिमाणेन = निजसमयपरिमाणेन, भूतानां = प्राणिनां।
9. जगद्योनिः = लोककारणम्। निरीश्वरः = ईश्वररहितः।
10. वेत्सि = जानासि। आत्मना = स्वदेहेन।
11. द्रवः = रसात्मकः। स्थूलः = इन्द्रियग्राह्यः। व्यक्तः = कार्यरूपः।
12. उद्धातः =उपक्रमः। न्यायैः = स्वरैः, उदात्तानुदात्तस्वरितैरित्यर्थः। प्रभवः = कारणम्
13. पुरुषार्थप्रवर्तिनीं = भोगापवर्गप्रवर्तिनीं। विदुः = वदन्ति।
14. परतोऽपि = उत्कृष्टेभ्योऽपि। वेधसामपि = सृष्टिकर्तृणां दक्षादीनां प्रजापतीनपि।
15. होता = हवनकर्ता, यजमानः। वेद्यं = ज्ञेयं। वेदिता = ज्ञाता। ध्येयं = ध्यानयोग्यम्।

## प्रश्नाः

1. संस्कृतभाषया उत्तरं लिखत —

(१) तारकेण विप्रकृताः देवाः कुत्र ययुः ?

(२) पितामहः आत्मानं कथं दर्शितवान् ?

(३) सर्वे देवाः कं स्तोतुं समुपचक्रिरे ?

(४) भूतानां प्रलयोदयौ कौ ?

2. विरुद्धार्थकपदानि लिखत —

सृष्टिः, उपक्रमः, सूक्ष्मः, दिवा, प्रकाशः ।

3. पर्यायपदानि लिखत —

ब्रह्मा, देवाः, तुराषाट्, विभूतिः ।

4. वाक्ये योजयत —

धाम, पश्चात्, प्राक्, सर्गः, वेत्सि, असि, शाश्वतः, नमः ।

**क्रियापद रूपाणि**

1. भू धातुः लुङ् लकारः (आविरभूत्)

| | | |
|---|---|---|
| अभूत् | अभूतां | अभूवन् |
| अभूः | अभूतं | अभूत |
| अभूवं | अभूव | अभूम |

2. विद् धातुः लट् लकारः (विदुः)

| | | |
|---|---|---|
| वेद | विदतुः | विदुः |
| वेत्थ | विदथुः | विद |
| वेद | विद्व | विद्म |

# १२. रामोदन्ते सुन्दरकाण्डः

अभिवाद्याथ सकलान् अमरान् पवनात्मजः ।
पुप्लुवे च गिरेस्तस्मात् विलङ्घयितुमर्णवम् ॥ १ ॥

स समुल्लङ्घ्य मैनाकं सुरसामभिवाद्य च ।
निहत्य सिंहिकां नीत्या पारं प्राप महोदधेः ॥ २ ॥

लङ्काधिदेवतां जित्वा तां प्रविश्यानिलात्मजः ।
सीतां विचन्वन्नद्राक्षीत् निद्राणं निशि रावणम् ॥ ३ ॥

अपश्यंस्तत्र वैदेहीं विचिन्वानस्ततस्ततः ।
अशोकवनिकां गत्वा सीतां खिन्नां ददर्श सः ॥ ४ ॥

पादपं कञ्चिदारुह्य तत्पलाशैः सुसंवृतः ।
आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन् ॥ ५ ॥

रावणस्तु तदाऽभ्येत्य मैथिलीं मदनार्दितः ।
भार्या भव ममेत्येवं बहुधा समयाचत ॥ ६ ॥

अहं त्वदनुगा न स्याम् इत्येषा तं निराकरोत् ।
काममन्युपरीतात्मा रावणोऽथ गृहं ययौ ॥ ७ ॥

गते तु रावणे सीतां प्रलपन्तीं स मारुतिः ।
उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम् ॥ ८ ॥

तत् समादाय वैदेही विलप्य च भृशं पुनः ।
चूडामणिं ददौ तस्य करे सा मारुतेः प्रियम् ॥ ९ ॥

मा विषादं कृथा देवि राघवो रावणं रणे ।
हत्वा त्वां नेष्यतीत्येनां आश्वास्य स विनिर्ययौ ॥ १० ॥

नीतिमान् सोऽपि सञ्चिन्त्य बभञ्जोपवनं च तत् ।
अक्षादीनि च रक्षांसि बहूनि समरेऽवधीत् ॥ ११ ॥

ततः शक्रजिता युद्धे बद्धः पवननन्दनः ।
प्रतापं रघुनाथस्य रावणं तं न्यवेदयत् ॥ १२ ॥

रक्षोदीपितलाङ्गूलः स तु लङ्कामशेषतः ।
दग्ध्वा सागरमुत्तीर्य वानरान् समुपागमत् ॥ १३ ॥

स गत्वा वानरैः साकं राघवायात्मना कृतम् ।
निवेदयित्वा सकलं ददौ चूडामणिं च तम् ॥ १४ ॥

## कठिनशब्दार्थः

1. अर्णवम् = समुद्रम् । पुप्लुवे = उत्प्लुतवान् ।
2. सुरसां = नागमाताम् । नीत्या = नीतिमार्गेण । पारं = तटम् ।
3. अनिलात्मजः = हनूमान् । विचिन्वन् = अन्विष्यन् । अद्राक्षीत् = ददर्श ।
4. वैदेही = सीता । खिन्नां = दुःखितां ।
5. पलाशैः = पर्णैः । तर्कयन् = विमृशन् ।
6. मदनार्दितः = कामपीडितः । अभ्येत्य = उपसृत्य ।
7. न स्याम् = न भवेयम् । निराकरोत् = तिरस्कृतवती । गृहं = सद्म । ययौ = गतवान् ।
8. प्रलपन्तीं = विलपन्तीं । वृत्तान्तं = वार्तां । प्रददौ = अदात् ।

9. चूडामणिः = शिरोऽलङ्कारभूतः आभरणविशेषः ।

10. मा कृथाः = 'न माङ् योगे" इत्यनेन 'अकृथाः', माङ्योगे—लुङ् इत्यस्य अकारस्य लोपः । रणे =युद्धभूमौ । विनिर्ययौ =निर्गतवान् । आश्वास्य = समाधाय ।

11. सञ्चिन्त्य = सम्यग्विचिन्त्य । बभञ्ज = भञ्जयामास ।

12. शक्रजिता = इन्द्रजिता । प्रतापं = सामर्थ्यं । बद्धः = बन्धितः ।

13. रक्षोदीपितलाङ्गूलः = रक्षोभिः ज्वलितपुच्छः । दग्ध्वा = भस्मीकृत्य ।

14. निवेदयित्वा = आवेद्य

निवेदयित्वा इत्ययं प्रयोगः प्रामादिकः । निवेद्य इति भवितव्यम् । गत्वा = रामस्य समीपं गत्वा ।

## व्याकरणविशेषः

नीतिः अस्य अस्तीति = नीतिमान् । शक्रं जयतीति = शक्रजित् । मरुतः अपत्यं पुमान् = मारुतिः । अनिलस्य आत्मजः = अनिलात्मजः । आस्ते स्म = स्मशब्दयोगे भूतार्थे लट् ।

## अभ्यासः

1. संस्कृते उत्तरं लिखत —

(१) हनूमान् समुद्रस्योपरि किं किं चकार ?

(२) सीता कुत्र कथं अवर्तत ?

(३) रावणः सीतां किमवदत् ?

(४) रावणस्य कोपः कथमभवत् ?

(५) हनूमान् सीतां कथं आश्वासयामास ?

(६) मारुतिः रावणस्य समीपं गन्तुं कथं शक्तोऽभवत् ?

2. सन्धिकार्यं कृत्वा लिखत—
गच्छन् + तत्र । राम + इति । रावणः + अथ । कं + चित् ।
इति + एनाम् । गिरेः + तस्मात् ।
3. सर्वपुरुषवचनेषु लिखत — आस्ते, ददर्श, अयाचत, ययौ
4. व्याकरणविशेषं लिखत—
(१) आस्ते स्म (२) विषादं मा कृथाः ।
5. विग्रहवाक्यं लिखत—
नतिमान्, शक्रजित्, मारुतिः, अनिलात्मजः ।

**क्रियापद रूपाणि**

1. दृश् धातुः लिट् लकारः (ददर्श)

| | | |
|---|---|---|
| ददर्श | ददृशतुः | ददृशुः |
| ददर्शिथ | ददृशथुः | ददृश |
| ददर्श | ददृशिव | ददृशिम |

2. सम् + याच् धातुः, लङ् लकारः (समयाचत)

| | | |
|---|---|---|
| अयाचत | अयाचेतां | अयाचन्त |
| अयाचथाः | अयाचेथां | अयाचध्वम् |
| अयाचे | अयाचावहि | अयाचामहि |

3. प्र + दा (डुदाञ्) धातुः, लिट् लकारः (प्रददौ)

| | | |
|---|---|---|
| ददौ | ददतुः | ददुः |
| ददिथ | ददथुः | दद |
| ददौ | ददिव | ददिम |

4. वि + निर् + या धातुः, लिट् लकारः (विनिर्ययौ)

| | | |
|---|---|---|
| ययौ | ययतुः | ययुः |
| ययिथ | यमथुः | यय |
| ययौ | ययिव | ययिम |

# १३. पञ्चतन्त्र–कथामुखम्

मनवे वाचस्पतये शुक्राय पराशराय ससुताय।
चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्तृभ्यः ॥ १ ॥

अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्। तत्र सकलकलापारंगतोऽमरशक्तिर्नाम राजा बभूव। तस्य त्रयः पुत्राः परमदुर्मेधसो बहुशक्तिरुग्रशक्तिरनन्तशक्तिश्चेति नामानो बभूवुः।

अथ राजा तान् शास्त्रविमुखानालोक्य सचिवानाहूय प्रोवाच — भोः ज्ञातमेतद्भवद्भिः, यन्ममैते पुत्राः शास्त्रविमुखा विवेकरहिताश्च। तदेतान् पश्यतो मे महदपि राज्यं न सौख्यमावहति। यतः,

अजात–मृत–मूर्खेभ्यो मृताजातौ सुतौ वरम्।
यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत् ॥ २ ॥

तदेतेषां यथा बुद्धिविकासो भवति, तथा कोऽप्युपायोऽनुष्ठीयताम्।

अत्र च मद्दत्तां वृत्तिं भुञ्जानानां पण्डितानां पञ्चशती वर्तते। ततो यथा मम मनोरथाः सिद्धिं यान्ति तथानुष्ठीयताम् इति।

तत्रैकोऽमात्यः प्रोवाच — देव! द्वादशभिर्वर्षैः व्याकरणशास्त्रं काव्यनाटकादीनि च, ततो धर्मशास्त्राणि मन्वादीनि, ततोऽर्थशास्त्राणि चाणक्यादीनि, ततः कामशास्त्राणि वात्स्यायनादीनि च अध्येतव्यानि। कृते चैवं धर्मार्थकामशास्त्रेषु सुनिष्णातो भवेदिति।

अथ तन्मध्यतः सुमतिर्नामापरः सचिवः प्राह–प्रभो! अशाश्वतोऽयं जीवितव्यविषयः। प्रभूतकालज्ञेयानि शास्त्राणि। तत् संक्षेपमात्रं सर्वशास्त्रसारं किंचिदेतेषां प्रबोधनार्थं विचिन्त्यतामिति।

अथ स पुनरेवाह – भोः राजन्! अत्रास्ति विष्णुशर्मा नाम भूसुरः। स च सकलशास्त्रपारंगमः, छात्रसमूहे लब्धकीर्तिश्च। तस्मै समर्पयत्वेतान्। स नूनं द्राक् प्रबुद्धान् करिष्यतीति।

ततो राजा विष्णुशर्माणमाहूय प्रोवाच — भो भगवन्! मदनुग्रहार्थं एतानर्थशास्त्रं प्रति द्राक् यथाऽनन्यसदृशान् विदधासि तथा कुरु। तदाहं त्वां शासनशतेन योजयिष्यामि।

अथ विष्णुशर्मा तं राजानमूचे — महाराज! श्रूयतां मे तथ्यवचनम्। नाहं विद्याविक्रयं शासनशतेनापि करोमि। पुनरेतांस्तव पुत्रान् मासषट्केन यदि नीतिशास्त्रज्ञान्न करोमि ततः स्वनामत्यागं करोमि। किं बहुना? श्रूयतां ममैष सिंहनादः। नाहमर्थलिप्सुर्ब्रवीमि। ममाशीतिवर्षस्य व्यावृत्तसर्वेन्द्रियार्थस्य न किंचिदर्थेन प्रयोजनम्। किंतु, त्वत्प्रार्थनासिद्ध्यर्थं सरस्वतीविनोदं करिष्यामि। तल्लिख्यतामद्यतनो दिवसः। यद्यहं षण्मासाभ्यन्तरे तव पुत्रान् नयशास्त्रं प्रत्यनन्यसदृशान् न करिष्यामि, ततो नार्हति देवो देवमार्गं सन्दर्शयितुम्।

अथ स राजा तस्य प्रतिज्ञया प्रहृष्टः सादरं स्वकुमारान् तस्मै समर्प्य परां निर्वृतिमाजगाम। विष्णुशर्मणापि तेषां कृते मित्रभेद–मित्रप्राप्ति–काकोलूकीय – लब्धप्रणाशऽपरीक्षितकारकाणि चेति पञ्च तन्त्राणि रचयित्वा पाठितास्ते राजपुत्राः। तेऽपि तान्यधीत्य मासषट्केन यथोक्ताः संवृत्ताः।

ततः प्रभृति पञ्चतन्त्रकं नाम नीतिशास्त्रं बालावबोधनार्थं भूतले प्रख्यातमभवत्। किं बहुना—

अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च।
न पराभवमाप्नोति शक्रादपि कदाचन॥

## कठिनशब्दार्थः

जनपदे=देशे, वृत्तिं=भृतिम्, भूसुरः=विप्रः, द्राक्=शीघ्रम्, आमुखम्=भूमिका (पीठिका), शासनशतेन=ग्रामशतेन, ऊचे= अवदत्, तथ्यवचनम्=सत्यवचनम्, सरस्वतीविनोदम्=सरस्वत्या बिनोदं, कथानकादि चर्चया मनोरञ्जनम्, देवमार्गम्=सद्गतिम्, निर्वृतिम्=हर्षम् शक्रः=इन्द्रः, संवृत्ताः=जाताः, नयशास्त्रम्=नीतिशास्त्रम्, अनन्य-सदृशान्=अन्ये सदृशाः न भवन्तीति, (शास्त्रपारंगतान् इत्यर्थः)

## अभ्यासः

**1.** संस्कृतभाषया उत्तरं लिखत —

१. नयशास्त्रकर्तारः के ?

२. अमरशक्तेः पुत्राः के ? कीदृशास्ते ?

३. राजा स्वकुमारान् विवेकिनः कर्तुं किं चकार ?

४. तस्यामात्येषु एकस्याभिप्रायः कः ?

५. सुमतेरभिप्रायं विवृणुत ।

६. विष्णुशर्मणः प्रतिज्ञा का ?

**2.** एकेन वाक्येन उत्तरं लिखत —

१. महिलारोप्यनगरस्य राजा कः ?

२. कौ सुतौ वरम् ?

३. कः यावज्जीवं दहति ?

४. सुमतिः कस्य मंत्री ?

५. पञ्चतन्त्रं केन ग्रथितम् ?

**3.** ससन्दर्भं विवृणुत —

१. छात्रसमूहे लब्धकीर्तिश्च ।

२. शासनशतेन योजयिष्यामि ।

३. नार्हति देवो देवमार्गं सन्दर्शयितुम् ।

४. न पराभवमाप्नोति ।

**4.** प्रयोगं व्यत्यस्यत —

१. कोऽप्युपायोऽनुष्ठीयताम् ।

२. एकोऽमात्यः प्रोवाच ।

३. नाहं विद्याविक्रयं करोमि ।

४. श्रूयतां ममैष सिंहनादः ।

५. विष्णुशर्मणा पाठितास्ते राजपुत्राः ।

**5.** कर्तृ—कर्म—क्रियापदानि निर्दिशत —

१. राजा सचिवान् प्रोवाच २. तस्मै समर्पयत्वेतान् ।

३. पाठितास्ते राजपुत्राः । ४. भोः ज्ञातमेतत् भवद्भिः ।

**6. a.** विभज्य सन्धिनाम लिखत —

१ यन्ममैते २ कोऽप्युपायोऽनुष्ठीयताम् ३ पुनरेतांस्तव

**b.** सुबन्त, तिङन्ताव्ययानि सूचयत —

१. ततो राजा विष्णुशर्माणमाहूय प्रोवाच ।

२. न पराभवमाप्नोति शक्रादपि कदाचन ।

# १४. चित्रग्रीवकथा

अस्ति गोदावरीतीरे विशालः शाल्मली तरुः। तत्र नानादिग्देशादगत्य रात्रौ पक्षिणो निवसन्ति।

अथ कदाचित् प्रभाते लघुपतनकनामा वायसः प्रबुद्धः, कृष्णवर्णं, ऊर्ध्वकेशं, यमकिंकाराकारं, व्याधमपश्यत्। तमालोक्याचिन्तयत् – "अद्य प्रातरेवानिष्टदर्शनं जातम्। न जाने किमनिष्टं भविष्यति!" इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः।

अचिन्तयच्च—

उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम्।
मरणव्याधिशोकानां किमद्य निपतिष्यति ॥ इति

अथ स व्याधः तण्डुलकणान् विकीर्य, जालं प्रसार्य अनतिदूरे प्रच्छन्नः स्थितः।

तस्मिन्नेव समये चित्रग्रीवनामा कपोतराजः सपरिवारः वियति विसर्पन् तण्डुलकणान् अवलोकयामास। ततः स चित्रग्रीवः तण्डुलकणलुब्धान् कपोतान् प्रत्याह – "कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः? भद्रमिदं न पश्यामि। सम्यक् निरूप्यतां तावत्। सर्वथा अविचार्य कर्म न कर्तव्यम्।

यतः—

सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः।
सुचिन्त्य चोक्तं सुविचार्य यत्कृतं
सुदीर्घकालेऽपि न याति विक्रियाम् ॥ इति

एतदाकर्ण्य कश्चित् दृप्तः कपोतः सदर्पमाह — "आ, किमेवमुच्यते-

वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
सर्वत्रैवं विचारेण भोजनेऽप्यप्रवर्तनम् ॥

अतः अवतरत शीघ्रम् "यथेच्छं भक्षयत" इति ।

ततस्ते सर्वेऽपि अवधीर्य चित्रग्रीववचनं लोभाविष्टचित्ता अवतीर्य जालेन बद्धा बभूवुः ।

ततो यस्य वचनात् तत्रावलम्बिताः तथा पाशाबद्धाश्च तं सर्वे तिरस्कर्तुमारभत —

यतः—

न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलम् ।
यदि कार्यविपत्तिः स्यात् मुखरस्तत्र हन्यते ॥

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच—

नायमस्य दोषः—

यतः—

आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् ।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने ॥

विपत्काले धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम् ।

यतः —

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता ॥

इदानीमप्येवं क्रियताम् । सर्वैरेकचित्तीभूय जालमादायोड्डीयताम् ।

यतः —

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः ॥

इति हितवचनं श्रुत्वा पक्षिणः सर्वे जालमादायोत्पतिताः। व्याधः सुदूराज्जालापहारकान् अवलोक्य पश्चाद्धावन्नचिन्तयत्—

जालमादाय गच्छन्ति संहताः पक्षिणोऽप्यमी।
यदा तु विवदिष्यन्ति वशमेष्यन्ति मे तदा॥

यदा ते दृष्टेरगोचरतां गताः तदा स व्याधो विषण्णः निराशश्च भूत्वा इमं श्लोकमपठत्

नहि भवति यन्न भाव्यं, भवति च भाव्यं विनापि यत्नेन।
करतलगतमपि नश्यति यस्य हि भवितव्यता नास्ति॥

ततस्ते सर्वेऽपि वने स्थितस्य मूषकराजस्य आप्तसुहृदः समीपमागत्य पाशान्मुक्ताः स्वं स्वं नीडं प्रविष्टाः।

एतत् सर्वं सम्यङ्निरीक्ष्य लघुपतनकः स्वयमपि वायसेन सह मैत्रीं संपादयितुं दृढं निश्चिकाय।

---

## कठिनशब्दार्थः

शाल्मली तरुः=वटवृक्षः, वायसः=काकः, अनतिदूरे=समीपे, प्रच्छन्नः=निगूढः, मुखरः=वाचालः (बहुभाषी), दृप्तः=गर्विष्ठः, दीर्घसूत्रः=चिरक्रियः, प्रतीकारः=परिहारः, तन्द्रा=आलस्यम्, भूतिः=ऐश्वर्यम्, ऊर्ध्वकेशम्=ऊर्ध्वाः केशाः यस्य तम् (व्याधम्), यमकिंकराकारम्=यमस्य किंकरस्य (सेवकस्य) आकार इव आकारः यस्य तम् (व्याधम्);।

## अभ्यासः

1. संस्कृतभाषया उत्तरं लिखत —

   १. व्याधः कथमासीत् ?

   २. वायसेन किमनिष्टं दृष्टम् ? तत्परिणामं लिखत ।

   ३. मानवेन नित्यं किमालोचनीयम् ?

   ४. चित्रग्रीवः कः ? स स्वाश्रितान् कथं ररक्ष ?

   ५. षट् दोषाः के ?

2. ससन्दर्भं विवृणुत —

   १. अद्य प्रातरेवानिष्टदर्शनं जातम् ।

   २. सर्वथा अविचार्य कर्म न कर्तव्यम् ।

   ३. मुखरस्तत्र हन्यते ।

   ४. वशमेष्यन्ति मे तदा ।

   ५. करतलगतमपि नश्यति ।

3. एकवाक्येनोत्तरं लिखत —

   १. वायसस्य नाम किम् ?

   २. आपत्काले केषां वचनं ग्राह्यम् ?

   ३. कार्यसाधिका का ?

4. पर्यायपदं लिखत —

   वायसः, किंकरः, व्याधः, वियत्, विचक्षणः

5. विरुद्धपदं लिखत —

   हितः, बन्धनम्, प्रबुद्धः, भद्रम्

6. व्याकरण विशेषं लिखत—

   वायेसन सह, कपोतराजः

---

# व्याकरणविभाग:

## 1. विसर्गसन्धिः

ವಿಸರ್ಗಕ್ಕೆ ಸ್ವರವಾಗಲಿ ಮೃದುವ್ಯಂಜನವಾಗಲಿ ಪರವಾದರೆ ವಿಸರ್ಗವು ವ್ಯತ್ಯಾಸವಾಗುತ್ತದೆ. ಇದಕ್ಕೆ ವಿಸರ್ಗಸಂಧಿ ಎಂದು ಹೆಸರು.

ಈ ವ್ಯತ್ಯಾಸವು ನಾಲ್ಕು ವಿಧವಾಗಿವೆ. 1. उकारः, 2. रेफः, 3. लोपः, 4. सकारः ।

ವ್ಯಂಜನಗಳಲ್ಲಿ ಎರಡು ವಿಧ. 1. कर्कशव्यञ्जनम् 2. मृदुव्यञ्जनम्

ಪ್ರತಿಯೊಂದು ವರ್ಗದ ಮೊದಲ ಎರಡು ಅಕ್ಷರಗಳಿಗೂ, 'श ष स ಗಳಿಗೂ ಕರ್ಕಶವ್ಯಂಜನಗಳೆಂದು ಹೆಸರು.

ಪ್ರತಿಯೊಂದು ವರ್ಗದ ಕಡೆಯ ಮೂರು ಅಕ್ಷರಗಳಿಗೂ य र ल व ह ಗಳಿಗೂ ಮೃದುವ್ಯಂಜನಗಳೆಂದು ಹೆಸರು.

### ಉಕಾರವಾಗುವ ನಿಯಮ

ಹ್ರಸ್ವ अकारದ ಮುಂದೆ ಇರುವ ವಿಸರ್ಗಕ್ಕೆ ಹ್ರಸ್ವ अकारವಾಗಲಿ, मृदुव्यञ्जन ವಾಗಲಿ ಪರವಾದರೆ ವಿಸರ್ಗವು उकारವಾಗುತ್ತದೆ.

ಉದಾ. — रामः + अपि = राम + उ + अपि = रामो + अपि — ಗುಣಸಂಧಿ. रामोऽपि-ಪೂರ್ವರೂಪಸಂಧಿ.

गजः + याति = गज + उ + याति = गजो याति

ವಿ. ಸೂ. — ರೇಫಾಂತವಾದ ಅವ್ಯಯಗಳ ವಿಸರ್ಗವು ಉಕಾರವಾಗುವುದಿಲ್ಲ. ಮೂಲವಾದ ರೇಫವೇ ಆಗಿರುತ್ತದೆ.

ಉದಾ. — अन्तः + गतः = अन्तर्गतः, पुनः + अयम् = पुनरयम्, स्वः + लोकः = स्वर्लोकः, प्रातः + नमामि = प्रातर्नमामि

ವಿ. ಸೂ. — ರೇಫ ಢಕಾರಗಳಿಗೆ ಕ್ರಮವಾಗಿ ರೇಫ ಢಕಾರಗಳು ಪರವಾದರೆ ರೇಫ ಢಕಾರಗಳು ಲೋಪವಾಗುತ್ತವೆ. ಮತ್ತು ಅದರ ಹಿಂದಿನ ಸ್ವರವು ದೀರ್ಘವಾಗುತ್ತದೆ.

ಉದಾ. — पुनर् + रमते = पुना रमते, हरिर् + रम्यः = हरी रम्यः लिढ् + ढ = लीढः

ವಿ. ಸೂ. — सः, एषः ಇವುಗಳ ವಿಸರ್ಗಕ್ಕೆ ಮೃದು ವ್ಯಂಜನ ಪರವಾದರೆ उ ಕಾರ ಬರುವುದಿಲ್ಲ. ವಿಸರ್ಗವು ಲೋಪವಾಗುತ್ತದೆ.

ಉದಾ.— सः + गतः = स गतः, एषः + याति + एष याति

## अभ्यासः

**1.** ಕೂಡಿಸಿರಿ —

देवः + अयम् ; मृगः + असौ ; कः + अहम् ; एषः + अद्य ; सः + अपि ; बालः + नमति ; काकः + रौति ; पुनः + जातः ; अन्तः + जलम् ; कः + अत्र ।

**2.** ಬಿಡಿಸಿರಿ —

सोहम्, पुत्रोनमति, रामोजयति, स्वरव्ययम्, देवोपि, वृषभोयम्, वृक्षोसौ, नरोसौ, लोकोयम्, नृपोजयति ।

### रेफ ವಾಗುವ ನಿಯಮ

**अ आ** ಕಾರಗಳನ್ನು ಬಿಟ್ಟು ಉಳಿದ ಸ್ವರದ ಮುಂದೆ ಇರುವ ವಿಸರ್ಗಕ್ಕೆ ಸ್ವರವಾಗಲಿ ಮೃದುವ್ಯಂಜನವಾಗಲಿ ಪರವಾದರೆ ವಿಸರ್ಗವು **रेफ** ವಾಗುತ್ತದೆ.

ಉದಾ.—

| | |
|---|---|
| मुनिः + इति = मुनिरिति | लक्ष्मीः + एषा = लक्ष्मीरेषा |
| भानुः + असौ = भानुरसौ | भूः + इयम् = भूरियम् |
| दुहितृ + अयम् = दुहितृरयम् | यतेः + आलयः = यतेरालयः |
| तैः = इदम् = तैरिदम् | गुरोः + आलयः = गुरोरालयः |
| गौः + इयम् = गौरियम् | कविः + जयति = कविर्जयति |
| श्रीः + भवति = श्रीर्भवति | धेनुः + गच्छति = धेनुर्गच्छति |
| धेनूः = नमामि = धेनूर्नमामि | मातृः + वन्दते = मातृर्वन्दते |
| मुनेः + महिमा = मुनेर्महिमा | एतैः + भक्षितम् = एतैर्भक्षितम् |
| भानोः + मयूखाः = भानोर्मयूखाः | नौः + याति = नौर्याति |

## अभ्यासः

ಬಿಡಿಸಿ ಬರೆಯಿರಿ —

गिरिर्महान्गिरेरब्धिर्महानब्धेर्नभो महत् ।
नभसोऽपि महद्ब्रह्म ततोऽप्याशा गरीयसी ॥
एतैर्जितः, तैरुक्तम्, मुनिरेषः, सर्वैरुक्तम्,
मनुरसौ, स्थाणुरयम् ।

## ಲೋಪ ವಾಗುವ ನಿಯಮ

(1) ಹ್ರಸ್ವ ಅಕಾರದ ಮುಂದೆ ಇರುವ ವಿಸರ್ಗಕ್ಕೆ ಹ್ರಸ್ವ ಅಕಾರವನ್ನು ಬಿಟ್ಟು ಉಳಿದ ಸ್ವರವು ಪರವಾದರೆ ವಿಸರ್ಗವು ಲೋಪವಾಗುತ್ತದೆ.

ಉದಾ. — बालः + इति = बाल इति

(2) आ ಕಾರದ ಮುಂದೆ ಇರುವ ವಿಸರ್ಗಕ್ಕೆ ಸ್ವರವಾಗಲಿ ಮೃದು ವ್ಯಂಜನವಾಗಲಿ ಪರವಾದರೆ ವಿಸರ್ಗವು ಲೋಪವಾಗುತ್ತದೆ.

ಉದಾ. — ताः + गच्छन्ति = ता गच्छन्ति
बालकाः + अद्य = बालका अद्य

(3) सः ಮತ್ತು एषः ಎಂಬ ಪದಗಳ ವಿಸರ್ಗಕ್ಕೆ ಹ್ರಸ್ವ ಅಕಾರವನ್ನು ಬಿಟ್ಟು ಉಳಿದ ಯಾವ ಅಕ್ಷರವು ಪರವಾದರೂ ವಿಸರ್ಗವು ಲೋಪವಾಗುತ್ತದೆ.

ಉದಾ. — सः + एवम् = स एवम्
एषः गतः = एष गतः

ವಿಸರ್ಗವು ಲೋಪವಾದ ಮೇಲೆ ಸ್ವರಸಂಧಿಯನ್ನು ಮಾಡಕೂಡದು.

## अभ्यासः

ಬಿಡಿಸಿ ಬರೆಯಿರಿ—

लोका इमे, नृप इति, स नमति, एष आगतः, देवा इमे

ಕೂಡಿಸಿ ಬರೆಯಿರಿ —

ताः = नमन्ति ; शरः + एषः ; सः = एव ; एषः + कार्यम् ; सः + इति ; अश्वः + आगतः ; गोपः + इति ; गजाः + धावन्ति ; मृगाः + अत्र ; कः + इति ;

## सकार ವಾಗುವ ನಿಯಮ

ವಿಸರ್ಗಕ್ಕೆ क ख प फ ಗಳನ್ನು ಬಿಟ್ಟು ಉಳಿದ ಕರ್ಕಶ ವ್ಯಂಜನವು ಪರವಾದರೆ ವಿಸರ್ಗವು ಸಕಾರವಾಗುತ್ತದೆ.

(ಕರ್ಕಶ ವ್ಯಂಜನಗಳಲ್ಲಿ च छ श ಗಳು ಪರವಾದರೆ स ಕಾರವು श ಕಾರವಾಗುತ್ತದೆ. ट ठ ष ಗಳು ಪರವಾದರೆ स ಕಾರವು ष ಕಾರವಾಗುತ್ತದೆ.)

ಉದಾ. : –

रामः + च = रामस् + च = रामश्च
मदनः + छात्रः = मदनस् + छात्रः = मदनश्छात्रः
हरिः + शेते = हरिस् + शेते = हरिश्शेते
कविः + टीकते = कविस् + टीकते = कविष्टीकते
धनुः + ठङ्कारः = धनुस् + ठङ्कारः = धनुष्ठङ्कारः
रामः + षष्ठः = रामस्+ षष्ठः = रामष्षष्ठः
गौः + तत्र = गौस्तत्र
बालः + थकारम् = बालस्थकारम्
मुनिः + सः = मुनिस्सः

## अभ्यासः

ಬಿಡಿಸಿ ಬರೆಯಿರಿ —

देवस्तत्र, गिरिश्च, मुनिस्तथा, एतैस्सह, बालाश्छत्रम्, शिवष्षण्मुखम् ।

ಕೂಡಿಸಿ ಬರೆಯಿರಿ —

रामः + तथा, ; मृगाः + च , ; कविः + षट्पदम्, ;
एताः + षट्, ; काः + तत्र, ; एताः + च ।

## 2. व्यञ्जनसन्धिः

ಒಂದು ವ್ಯಂಜನದ ಜೊತೆ ಮತ್ತೊಂದು ವ್ಯಂಜನವು ಸೇರಿದಾಗ ವ್ಯತ್ಯಾಸವಾಗುತ್ತದೆ. ಆದಕ್ಕೆ ವ್ಯಂಜನಸಂಧಿ ಎಂದು ಹೆಸರು.

ಉದಾ. :

वाक् + जालम् = वाग्जालम्

1. **श्चुत्वसन्धिः** ಸಕಾರ ತವರ್ಗಗಳಿಗೆ ಶಕಾರ ಚವರ್ಗಗಳ ಸಂಬಂಧವಿದ್ದಾಗ ಸಕಾರಕ್ಕೆ ಶಕಾರವೂ ತವರ್ಗಕ್ಕೆ ಚವರ್ಗವೂ ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

ಉದಾ. :

रामस् + शेते = रामश्शेते ; हरिस् + च = हरिश्च
तत् + चित्रम् = तच्चित्रम् ; गुणिन् + जय = गुणिञ्जय

2. **ष्टुत्वसन्धिः** ಸಕಾರ ತವರ್ಗಗಳಿಗೆ ಷಕಾರ ಟವರ್ಗಗಳ ಸಂಬಂಧವಿದ್ದಾಗ ಸಕಾರಕ್ಕೆ ಷಕಾರವೂ ತವರ್ಗಕ್ಕೆ ಟವರ್ಗವೂ ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

ಉದಾ. :

रामस् + षष्टः = रामष्षष्ठः
कविस् + टीकते = कविष्टीकते
तत् + टीका = तट्टीका
धनुस् + ठङ्कारः = धनुष्ठङ्कारः
चक्रिन् + ढौकसे = चक्रिण्ढौकसे

3. **जश्त्वसन्धिः** ಒಂದು ಪದದ ಕೊನೆಯಲ್ಲಿರುವ ವರ್ಗೀಯ ವ್ಯಂಜನಕ್ಕೆ ಸ್ವರವಾಗಲಿ, ಮೃದುವ್ಯಂಜನವಾಗಲಿ ಪರವಾದರೆ ಆಯಾ ವರ್ಗದ ಮೂರನೆಯ ಅಕ್ಷರವು ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

ಉದಾ. :

| | |
|---|---|
| स्रक् + एषा = स्रगेषा | अच् + अन्तः = अजन्तः |
| षट् + आननः = षडाननः | तत् + अपि = तदपि |
| अप् + इन्द्रियम् = अबिन्द्रियम् | वाक् + जालम् = वाग्जालम् |
| अच् + वर्णः = अज्वर्णः | षट् + जम् = षड्जम् |
| तत् + यथा = तद्यथा | अप् + जम् = अब्जम् |

4. **अनुनासिकसन्धिः** ವರ್ಗದ ಮೊದಲನೆಯ ಅಕ್ಷರಕ್ಕೆ ಅನುನಾಸಿಕವು ಪರವಾದರೆ ಆಯಾ ವರ್ಗದ ಅನುನಾಸಿಕವು ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

ಉದಾ. : वाक् + मयम् = वाङ्मयम्
षट् + मयूखाः = षण्मयूखाः
चित् + मयः = चिन्मयः
अप् + मयम् = अम्मयम्

5. **अनुस्वारसन्धिः** ಪದದ ಕೊನೆಯಲ್ಲಿರುವ ಮಕಾರಕ್ಕೆ ವ್ಯಂಜನವು ಪರವಾದರೆ ಮಕಾರಕ್ಕೆ ಅನುಸ್ವಾರವು (೦) ಬರುತ್ತದೆ.

ಉದಾ. – रामम् + वन्दे = रामं वन्दे

6. **परसवर्णसन्धिः** ಅನುಸ್ವಾರಕ್ಕೆ श ष स ह ಬಿಟ್ಟು ಉಳಿದ ವ್ಯಂಜನವು ಪರವಾದರೆ ಆಯಾ ವರ್ಗದ ಅನುನಾಸಿಕವು ಅನುಸ್ವಾರಕ್ಕೆ ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

ಉದಾ.—

| | |
|---|---|
| त्वं + करोषि = त्वङ्करोषि | अं + जनम् = अञ्जनम् |
| अं + डः = अण्डः | इं + धनम् = इन्धनम् |
| कं + पः = कम्पः | सं + ततिः = सन्ततिः |

ಪದಾಂತದಲ್ಲಿರುವ ತವರ್ಗಕ್ಕೆ ಲಕಾರವು ಪರವಾದರೆ ಆ ತವರ್ಗಕ್ಕೆ ಅನುರೂಪವಾದ ಲಕಾರವು ಬರುತ್ತದೆ.

ಉದಾ. — तल् + लयः = तल्लयः

विद्वान् + लिखति = विद्वाँल्लिखति

7. **छत्वसन्धिः** ಪ್ರತಿ ವರ್ಗದ ಮೊದಲ ನಾಲ್ಕು ಅಕ್ಷರಗಳ ಮುಂದೆ ಇರುವ ಶಕಾರಕ್ಕೆ ಸ್ವರ ಅಥವಾ ह य व र ल ಗಳ ಪೈಕಿ ಯಾವುದಿದ್ದರೂ ಶಕಾರವು ಛಕಾರವಾಗುತ್ತದೆ.

ಉದಾ.– तद् + शिवः = तज् + शिवः = ಶ್ಚುತ್ವಸಂಧಿ, ಚರ್ತ್ವಬಂದು

तच् + शिवः = तच्छिवः = ಛತ್ವಸಂಧಿ

तद् + श्लोकः = तच्छ्लोकः ; उत् + श्वासः = उच्छ्वासः

8. **ङमुडागमसन्धिः** ಹ್ರಸ್ವಸ್ವರದ ಮುಂದೆ ಇರುವ **ङ ण न** ಗಳಿಗೆ ಸ್ವರವು ಪರವಾದರೆ **ङ ण न** ಗಳು ಕ್ರಮವಾಗಿ ಆಗಮವಾಗುತ್ತವೆ.

ಉದಾ :– प्रत्यङ् + आत्मा = प्रत्यङ्ङात्मा

सुगण् + ईशः = सुगण्णीशः

सन् + अच्युतः = सन्नच्युतः

भगवन् + इतः = भगवन्नितः

9. **सत्वसन्धिः** ಪದದ ಕೊನೆಯಲ್ಲಿರುವ **न** ಕಾರಕ್ಕೆ **च छ** ಗಳು ಪರವಾದರೆ **न** ಕಾರಕ್ಕೆ **श** ಕಾರವೂ ಅದರ ಪೂರ್ವದಲ್ಲಿ ಅನುಸ್ವಾರವೂ, **ट ठ** ಗಳು ಪರವಾದರೆ **न** ಕಾರಕ್ಕೆ **ष** ಕಾರವೂ ಅದರ ಪೂರ್ವದಲ್ಲಿ ಅನುಸ್ವಾರವೂ, **त थ** ಗಳು ಪರವಾದರೆ **न** ಕಾರಕ್ಕೆ **स** ಕಾರವೂ ಅದರ ಪೂರ್ವದಲ್ಲಿ ಅನುಸ್ವಾರವೂ ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

ಉದಾ. : तान् + च = तांश्च

एतान् + छात्रान् = एतांश्छात्रान्

पाठान् + टीकते = पाठांष्टीकते

तांन् + ठक्कारान् = तांष्ठक्कारान्

बालान् + तदा = बालांस्तदा

10.. **पूर्वसवर्णसन्धिः** ಪದದ ಕೊನೆಯಲ್ಲಿರುವ ವರ್ಗದ ಮೊದಲಕ್ಷರಕ್ಕೆ ಹಕಾರವು ಪರವಾದರೆ ಆಯಾ ವರ್ಗದ ನಾಲ್ಕನೇ ಅಕ್ಷರವು ಬರುತ್ತದೆ.

ಉದಾ. :

वाक् + हरति = वाग्घरति, षट् + हयाः = षड्ढयाः
तत् + हितम् = तद्धितम्, अप् + हविः = अब्भविः

## अभ्यासः

ಬಿಡಿಸಿ ಸಂಧಿಯ ಹೆಸರು ತಿಳಿಸಿರಿ:

मरुद्भ्याम्, कश्चन, तन्न, अज्झलौ, तद्यथा, तांस्तथा, कण्टकम्, हरिंनमति, वाङ्महिमा, षड्ढंसाः ।

ವಿ. ಸೂ. : ವ್ಯಂಜನಾಂತ ಸಾಧಾರಣ ಶಬ್ದಗಳ ವಿಭಕ್ತಿರೂಪಗಳನ್ನು ಕಂಠಪಾಠ ಮಾಡಬೇಕು.

---

# ಸೂಕ್ತಿರತ್ನಗಳು

## ಕಂಠಪಾಠ ಮಾಡಿರಿ

1. स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति।
2. चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।
3. निरीहाणामीशस्तृणमिव तिरस्कारविषयः।
4. उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।
5. क्लेशः फलेन हि पुनर्नवतां विधत्ते।
6. प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्।
7. प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः।
8. यादृशं भक्षयेदन्नं बुद्धिर्भवति तादृशी।
9. संभावितस्य चाकीर्तिर्मरणादतिरिच्यते।
10. याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।

---

# शान्तिमन्त्रः

यं वैदिका मन्त्रदृशः पुराणाः ।
इन्द्रं यमं मातरिश्वानमाहुः ।
वेदान्तिनोऽनिर्वचनीयमेकं
यं ब्रह्मशब्देन विनिर्दिशन्ति ॥

शैवा यमीशं शिव इत्यवोचन्
यं वैष्णवा विष्णुरिति स्तुवन्ति ।
बुद्धस्तथार्हन्निति बौद्धजैनाः
सत् श्री अकालेति च सिख्खसन्तः ॥

शास्तेति केचित् कतिचित्कुमारः
स्वामीति मातेति पितेति भक्त्या ।
यं प्रार्थयन्ते जगदीशितारं
स एक एव प्रभुरद्वितीयः ॥

ॐ शान्तिः शान्तिः शन्तिः ॥

यावदस्ति त्रयी लोके
चतुर्मुख-मुखोद्भवा ।
यावद्वा रामचरितं
वाल्मीकिकविचित्रितम् ॥

क्षरन्त्यमृतधारा वा
यावद्व्यासस्य सूक्तयः ।
वाग्देव्या वरपुत्रस्य
कालिदासस्य वा गिरः ॥

तावदेषा देवभाषा
देवी स्थास्यति भूतले ।
यावच्च वंशोऽस्त्यार्याणां
तावदेषा ध्रुवं ध्रुवा ॥

# तृतीया परीक्षा
## मार्गदर्शिनी प्रश्नपत्रिका उत्तरलेखनक्रमश्च

ಇದೊಂದು ಮಾದರಿಯಷ್ಟೆ. ಇದರ ಆಧಾರದ ಮೇಲೆ ಪ್ರತಿವರ್ಷವೂ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ರಚಿಸುವುದು ಉತ್ತಮ.

ಇಲ್ಲಿ ಉತ್ತರ ಬರೆಯುವ ಕ್ರಮವನ್ನೂ ಕೂಡ ಒಂದೊಂದು ಉದಾಹರಣೆಯ ಮೂಲಕ ತಿಳಿಸಲಾಗಿದೆ. ವಿದ್ಯಾರ್ಥಿಗಳು ಈ ಕ್ರಮವನ್ನು ಅನುಸರಿಸುವುದು ಸೂಕ್ತ.

### ಪ್ರಥಮ ಪತ್ರಿಕೆ

ಕಾಲ : 3–00 ಘಂಟೆಗಳು ಅಂಕಗಳು : 100

ನೂರು ಅಂಕಗಳ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಸಾಮಾನ್ಯವಾಗಿ 60 ಅಂಕಗಳ ಪ್ರಶ್ನೆಗಳು ಸಂಸ್ಕೃತದಲ್ಲಿ ಉತ್ತರಿಸುವ ಪ್ರಶ್ನೆಗಳಾಗಿರಬೇಕು.

ಉಳಿದ 40 ಅಂಕಗಳ ಪ್ರಶ್ನೆಗಳು ಕನ್ನಡ ಅಥವಾ ಆಂಗ್ಲಭಾಷೆಯಲ್ಲಿ ಉತ್ತರಿಸುವ ಪ್ರಶ್ನೆಗಳಾಗಿರಬೇಕು.

ಪ್ರಶ್ನೆಗಳು ಪಾಠಗಳ ಕೊನೆಯಲ್ಲಿರುವ ಅಭ್ಯಾಸದಲ್ಲಿರುವವುಗಳಾಗಿರಬಹುದು, ಅಥವಾ ಪಾಠ್ಯಪುಸ್ತಕದ ವಿಷಯಗಳಿಗೆ ಸಂಬಂಧಿಸಿದ ಸ್ವಂತ ಪ್ರಶ್ನೆಗಳಾಗಿರಬಹುದು.

**1. पञ्चानां संस्कृते उत्तरं लिखत —** 5 x 1 = 5

ಇಲ್ಲಿ ಒಂದು ಶಬ್ದದಿಂದ (ಒಂದು ಪೂರ್ಣವಾಕ್ಯದಲ್ಲಿ) ಉತ್ತರಿಸುವ ಸಣ್ಣ ಪ್ರಶ್ನೆಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರ ಒಂದು ಪೂರ್ಣವಾಕ್ಯದಲ್ಲಿರಬೇಕು. ಸಂಕ್ಷಿಪ್ತವಾಗಿರಬೇಕು.

ಉದಾ.— ಪ್ರಶ್ನೆ — केन समस्या पूरिता ?

ಉತ್ತರ— कालिदासेन समस्या पूरिता ।

**2. षण्णाम् संस्कृते उत्तरं लिखत —** 6 x 2 = 12

ಇಲ್ಲಿ ಒಂದು ಅಥವಾ ಎರಡು ವಾಕ್ಯಗಳಲ್ಲಿ ಉತ್ತರಿಸುವ ಪ್ರಶ್ನೆಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರವು ಒಂದು ಅಥವಾ ಎರಡು ವಾಕ್ಯಗಳಲ್ಲಿ ಸ್ಪಷ್ಟವಾಗಿರಬೇಕು.

ಉದಾ. —ಪ್ರಶ್ನೆ – योगी उज्जयनीं कदा आगच्छत् ?

ಉತ್ತರ— यदा विक्रमार्कः भूमिं पालयति स्म तदा योगी उज्जयिनीं आगच्छत् ।

**3. त्रयाणां संस्कृते उत्तरं लिखत —** 3 x 3 = 9

ಇಲ್ಲಿ ಮೂರು–ನಾಲ್ಕು ವಾಕ್ಯಗಳಲ್ಲಿ ಉತ್ತರಿಸುವ ಪ್ರಶ್ನೆಗಳಿರಬೇಕು.

ಉತ್ತರ ಮೂರ್ನಾಲ್ಕು ಸಣ್ಣ ಹಾಗೂ ಸ್ಪಷ್ಟ ವಾಕ್ಯಗಳಲ್ಲಿರಬೇಕು. ವಿದ್ಯಾರ್ಥಿಯು ಸ್ವತಃ ವಾಕ್ಯ ರಚನೆ ಮಾಡಿ ಬರೆದರೆ ಉತ್ತಮ.

ಉದಾ. —ಪ್ರಶ್ನೆ — गृहिणी द्विजं किमवदत् ?

ಉತ್ತರ — गृहिणी द्विजं अवदत् — भोः विप्र ! अहं बलाका न । क्रोधं मा कुरु । क्रोधं संहर । पतिव्रतायाः मम पतिरेव पूज्यतमः, परं दैवतं च । जितेन्द्रियः धर्मपरः शुचिरपि यः कामक्रोधौ न वशयेत् सः न ब्राह्मणः । अतस्त्वं क्रोधं त्यज ।" इति

**4. चतुर्णां मातृभाषया उत्तरं लिखत –** 4 x 4 = 16

ಇಲ್ಲಿ ಪ್ರಶ್ನೆ ಸಂಸ್ಕೃತದಲ್ಲಿರಬೇಕು. ಪ್ರಬಂಧ ಮಾದರಿಯ ಉತ್ತರ ಬರೆಯಲು ಅನುಕೂಲವಾಗುವ ಪ್ರಶ್ನೆಗಳಿರಬೇಕು.

ಉತ್ತರವನ್ನು ಕನ್ನಡ ಅಥವಾ ಆಂಗ್ಲಭಾಷೆಯಲ್ಲಿ ಬರೆಯಬೇಕು. ಸುಮಾರು ಒಂದು ಅಥವಾ ಒಂದೂವರೆ ಪುಟಗಳಷ್ಟು ಉತ್ತರವಿರಬೇಕು. ಪೀಠಿಕೆ, ವಿವರಣೆ, ಸಮಾಪ್ತಿ ಹೀಗೆ ಮೂರು ಹಂತಗಳಲ್ಲಿ ಉತ್ತರವಿರಬೇಕು. ಮಧ್ಯೆ ಮಧ್ಯೆ ಸಂಸ್ಕೃತ ವಾಕ್ಯಗಳನ್ನು ಉದ್ಧರಿಸಬೇಕು.

**5. चतुर्णां ससन्दर्भं विवरणं मातृभाषया लिखत —** 4 x 3 = 12

ಇಲ್ಲಿ ಪ್ರಶ್ನೆಗಳನ್ನು ಅಭ್ಯಾಸದಿಂದ ಅಥವಾ ಪಾಠ–ಪದ್ಯಗಳ ಮಧ್ಯದಿಂದ ಕೇಳಬಹುದು.

ಉತ್ತರವನ್ನು ನಾಲ್ಕು ಅಂಶಗಳಲ್ಲಿ ಬರೆಯಬೇಕು

1) ಯಾವ ಪಾಠದಿಂದ ಆರಿಸಿದ್ದು ?
2) ಯಾರು, ಯಾರಿಗೆ ಹೇಳಿದ್ದು ?
3) ಯಾವಾಗ ?
4) ವಾಕ್ಯದ ಅರ್ಥ.

**6. द्वयोः सान्वयं अर्थं मातृभाषया लिखत —** 2 x 2 = 4

ಇಲ್ಲಿ ಶ್ಲೋಕಗಳನ್ನು ಪದ್ಯಭಾಗದಿಂದ ಅಥವಾ ಪಾಠಗಳ ಮಧ್ಯದಿಂದ ಕೇಳಬಹುದು.

ಅನ್ವಯಕ್ರಮದಲ್ಲಿ ಅರ್ಥವನ್ನು ಬರೆಯಬೇಕು. ಪದಪದಾರ್ಥಕ್ರಮ ಅಥವಾ ಅನ್ವಯ–ಅರ್ಥ ಕ್ರಮವನ್ನು ಅನುಸರಿಸಬಹುದು.

**7. श्लोकद्वयं पूरयत –** 2 x 2 = 4

ಇಲ್ಲಿ ಕಂಠಪಾಠಕ್ಕೆ ನಿಗದಿಪಡಿಸಿದ ಪದ್ಯಭಾಗದಿಂದ ಶ್ಲೋಕಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರಿಸುವಾಗ ಶ್ಲೋಕವನ್ನು ಪೂರ್ಣವಾಗಿ ಸ್ಪಷ್ಟವಾಗಿ ಬರೆಯಬೇಕು. ಸಂಧಿಯುಕ್ತಪದಗಳನ್ನು ಬಿಡಿಸಿ ಬರೆಯಬಾರದು.

**8. गद्यभागस्य अनुवादं कुरुत –** 1 x 4 = 4

ಇಲ್ಲಿ ಪಾಠಗಳ ಮಧ್ಯದಿಂದ ನಾಲ್ಕು ವಾಕ್ಯಗಳಲ್ಲಿರುವ ಒಂದು ಭಾಗವನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರಿಸುವಾಗ ಗದ್ಯಭಾಗದಲ್ಲಿರುವ ಪ್ರತಿಯೊಂದು ವಾಕ್ಯಕ್ಕೂ ಅರ್ಥ ಸ್ಪಷ್ಟವಾಗಿರಬೇಕು. ಮಾತೃಭಾಷೆಯಲ್ಲಿ ಉತ್ತರಿಸಬೇಕು.

**9. रिक्तस्थानानि पूरयत –** 4 x 1 = 4

ಇಲ್ಲಿ ಪಾಠ–ಪದ್ಯಗಳ ಕೊನೆಗೆ ಅಭ್ಯಾಸದಲ್ಲಿರುವ ಪ್ರಶ್ನೆಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರವನ್ನು ಪೂರ್ಣವಾಕ್ಯದಲ್ಲಿ ಬರೆದು, ತುಂಬಿದ ಪದದ ಕೆಳಗೆ ಗೆರೆಯೆಳೆಯಬಹುದು ಅಥವಾ ತುಂಬುವ ಯೋಗ್ಯಪದವನ್ನು ಮಾತ್ರ ಬರೆದರೂ ಸಾಕು.

**10. पर्यायपदानि लिखत (त्रयाणाम्) –** 3 x 1 = 3

ಇಲ್ಲಿ ಪಾಠ–ಪದ್ಯಗಳ ಕೊನೆಗ ಕೇಳಿರುವ ಪದಗಳನ್ನು ಕೇಳುವುದು ಸೂಕ್ತ.

ಉತ್ತರ—ಉಚಿತವಾದ ಒಂದು ಪದ ಬರೆದರೆ ಸಾಕು.

ಉದಾ. — राजा = नृपः

**11. विरुद्धार्थकपदानि लिखत (त्रयाणाम्)** 3 x 1 = 3

ಇಲ್ಲಿ ಪಾಠ ಹಾಗೂ ಪದ್ಯಗಳ ಕೊನೆಯಲ್ಲಿ ಅಭ್ಯಾಸದಲ್ಲಿ ಕೇಳಿದ ಪದಗಳನ್ನು ಕೇಳುವುದು ಸೂಕ್ತ.

ಉತ್ತರವು ಉಚಿತವಾದ ಒಂದು ಪದವಲ್ಲಿ ಇರಬೇಕು.

ಉದಾ. — प्रकाशः x तमः

**12. वाक्यदोषं परिहरत –** 3 x 1 = 3

ಇಲ್ಲಿ ವ್ಯಾಕರಣರೀತ್ಯಾ ದೋಷವಿರುವ ಸರಳ ವಾಕ್ಯಗಳನ್ನು ಕೇಳಬೇಕು. ಮೂರು ವಾಕ್ಯಗಳನ್ನು ಮಾತ್ರ ಕೇಳಬೇಕು.

ಉತ್ತರವು ಪೂರ್ಣವಾಕ್ಯದಲ್ಲಿರಬೇಕು.

ಉದಾ. —ಪ್ರಶ್ನೆ – भवान् गच्छ । ಉತ್ತರ — भवान् गच्छतु ।

**13. वाक्येषु योजयत – (त्रीणि)** 3 x 1 = 3

ಇಲ್ಲಿ ಪಾಠದ ಕೊನೆಯಲ್ಲಿ ಅಭ್ಯಾಸದಲ್ಲಿ ಕೇಳಿದ ಅಥವಾ ಕಠಿಣಪದಗಳ ಅರ್ಥದಲ್ಲಿ ಕೇಳಿದ ಪ್ರಸಿದ್ಧ ಪದಗಳನ್ನು ಕೇಳಬಹುದು.

ಉತ್ತರವನ್ನು ಪೂರ್ಣವಾಕ್ಯದಲ್ಲಿ ಬರೆಯಬೇಕು.

ವಾಕ್ಯವು ವ್ಯಾಕರಣರೀತ್ಯಾ ಶುದ್ಧವಾಗಿರಬೇಕು.

ಉದಾ. — गत्वा — रमेशः नदीं गत्वा जलं आनयति ।

**14. एकस्य रूपाणि सर्वपुरुषवचनेषु लिखत –** 1 x 3 = 3

ಇಲ್ಲಿ ಪಾಠ–ಪದ್ಯಗಳ ಕೊನೆಯಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಕ್ರಿಯಾಪದ ರೂಪಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರವನ್ನು ಸ್ಪಷ್ಟವಾಗಿ ಆಯಾ ಲಕಾರದಲ್ಲಿ ಒಂಭತ್ತೂ ರೂಪಗಳನ್ನು ಬರೆಯಬೇಕು.

ಉದಾ. — ददातु

| | **ए.व.** | **द्वि.व.** | **ब.व.** |
|---|---|---|---|
| प्रथमपुरुषः | ददातु | दत्ताम् | ददतु |
| मध्यमपुरुषः | देहि | दत्तम् | दत्त |
| उत्तमपुरुषः | ददानि | ददाव | ददाम |

**15. सन्धि विभज्य सन्धिनाम लिखत –** 3 x 1 = 3

ಇಲ್ಲಿ ಪಾಠ ಹಾಗೂ ಪದ್ಯಗಳ ಕೊನೆಯಲ್ಲಿ ಅಭ್ಯಾಸದಲ್ಲಿ ಕೇಳಿದ ಅಥವಾ ಪಾಠದ ಮಧ್ಯದಲ್ಲಿ ಇರುವ ಅಥವಾ ಪುಸ್ತಕದ ಕೊನೆಯಲ್ಲಿ ವ್ಯಾಕರಣ ವಿಭಾಗದಲ್ಲಿರುವ ಪದಗಳನ್ನು ಕೇಳಬಹುದು.

ಉತ್ತರವನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿಯೇ ಬರೆಯಬೇಕು. ಸಂಧಿಯಾದ ಪದವನ್ನು ಬಿಡಿಸಿ, ಸಂಧಿಯ ಹೆಸರನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯಬೇಕು.

ಉದಾ. — अद्य + एव = वृद्धि सन्धिः ।

**16. लोकोक्तीः पूरयित्वा अर्थं मातृभाषया लिखत —** 2 x 2 = 4

ಪುಸ್ತಕದ ಕೊನೆಯಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಲೋಕೋಕ್ತಿಗಳನ್ನೇ ಕೇಳಬೇಕು.

ಉತ್ತರಿಸುವಾಗ, ಲೋಕೋಕ್ತಿಯನ್ನು ಪೂರ್ಣಗೊಳಿಸಬೇಕು. ಅದರ ಅರ್ಥವನ್ನು ಒಂದೆರಡು ವಾಕ್ಯಗಳಲ್ಲಿ ಮಾತೃಭಾಷೆಯಲ್ಲಿ ವಿವರಿಸಬೇಕು.

ಉದಾ. —ಪ್ರಶ್ನೆ —उद्योगिन

ಉತ್ತರ— उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः ।

ಸಂಪತ್ತು ಉದ್ಯೋಗಿಯಾದ ಪುರುಷಸಿಂಹನನ್ನು ಸೇರುತ್ತದೆ. ಯಾವನು ಆಲಸಿಯಾಗಿರದೇ ಸತತವಾಗಿ ಉದ್ಯೋಗದಲ್ಲಿ ನಿರತನಾಗಿರುತ್ತಾನೆಯೋ, ಅಂತಹ ಕಾರ್ಯವುಳ್ಳ ಉತ್ಸಾಹಿಯಾದ ಪುರುಷನಿಗೆ ಸರ್ವವಿಧವಾದ ಸಂಪತ್ತು ಲಭಿಸುತ್ತದೆ ಎಂಬುದು ಇದರ ತಾತ್ಪರ್ಯ.

**17. संयोज्य लिखत —** 4 x 1 = 4

ಇಲ್ಲಿ ಪಾಠ ಹಾಗೂ ಪದ್ಯಗಳ ವಿಷಯಗಳಿಗೆ ಸಂಬಂಧಪಟ್ಟ ಸಾಮಾನ್ಯಜ್ಞಾನವನ್ನು ಹೊಂದಿರುವ ಪ್ರಶ್ನೆಗಳನ್ನು ಕೇಳಬಹುದು. ಸಂಧಿಗೆ ಸಂಬಂಧಪಟ್ಟಂತೆ ಅಥವಾ ಶಬ್ದಗಳಿಗೆ ಸಂಬಂಧಪಟ್ಟಂತೆ ಪ್ರಶ್ನೆಗಳನ್ನು ಕೇಳಬಹುದು **अ** ಮತ್ತು **आ** ಭಾಗಗಳು ಪ್ರತ್ಯೇಕವಾಗಿದ್ದು **आ** ಭಾಗದಲ್ಲಿ ಐದು ಪದಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರಿಸುವಾಗ **अ** ಭಾಗದಲ್ಲಿರುವ ಪದಗಳನ್ನು ಬರೆದುಕೊಂಡು ನಂತರ **आ** ಭಾಗದಲ್ಲಿ ಸರಿಹೊಂದುವ ಪದಗಳನ್ನು ಪೂರ್ಣವಾಗಿ ಬರೆದಿರಬೇಕು.

**18. कर्तृ-कर्म-क्रियापदं च लिखत —** 4 x 1 = 4

ಇಲ್ಲಿ कर्तृ - कर्म - क्रियापद ದಿಂದ ಕೂಡಿದ ನಾಲ್ಕು ವಾಕ್ಯಗಳನ್ನು ಕೇಳಬೇಕು. ಪಾಠಗಳಲ್ಲಿರುವ ಅಥವಾ ಸ್ವಂತ ವಾಕ್ಯಗಳಾಗಬಹುದು.

ಉತ್ತರಿಸುವಾಗ ಯಾವುದು ಯಾವ ಪದವೆಂದು ಸ್ಪಷ್ಟವಾಗಿ ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯಬೇಕು.

ಉದಾ. —ಪ್ರಶ್ನೆ — रामः श्लोकं पठति ।

ಉತ್ತರ — रामः = कर्तृपदम् ।
श्लोकं = कर्मपदम् ।
पठति = क्रियापदम् ।

ಅಥವಾ

**एषां अनुरूपाणि प्रश्नवाक्यानि रचयत –** 4 x 1 = 4

ಇಲ್ಲಿ ನಾಲ್ಕು ಸ್ಪಷ್ಟವಾದ ಸರಳವಾದ ಪ್ರಶ್ನೆಕೇಳಲು ಅನುಕೂಲವಾಗುವ ರೀತಿಯಲ್ಲಿ ಪಾಠಗಳಲ್ಲಿರುವ ಅಥವಾ ಸ್ವಂತ ವಾಕ್ಯಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರಿಸುವಾಗ ಒಂದು ರೀತಿಯಲ್ಲಿ ಪ್ರಶ್ನೆ ಕೇಳಿದರೆ ಸಾಕು. ಸ್ಪಷ್ಟವಾಗಿರಬೇಕು. ಸಂಸ್ಕೃತದಲ್ಲಿರಬೇಕು.

ಉದಾ. — ಪ್ರಶ್ನೆ – छात्राः क्रीडाङ्गणे क्रीडन्ति ।

ಉತ್ತರ – छात्राः कुत्र कीडन्ति ?

ಅಥವಾ

क्रिडाङ्गणे के क्रीडन्ति ?

ಅಥವಾ

छात्राः क्रीडाङ्गणे किं कुर्वन्ति ?

ಈ ಮೂರು ಉತ್ತರಗಳಲ್ಲಿ ಯಾವುದಾದರೂ **ಒಂದನ್ನು** ಬರೆದರೆ ಸಾಕು.

ಅಥವಾ

**समूहेतरपदं पृथक् लिखत –** 4 x 1 = 4

ಇಲ್ಲಿ ನಾಲ್ಕು ಅಥವಾ ಐದು ಪದಗಳಿರುವ ಒಂದೊಂದು ಗುಂಪನ್ನು ಕೊಡಬೇಕು. ಆ ಗುಂಪಿಗೆ ಸೇರದ ಪದವು ಬಂದಿರಬೇಕು. ಪಾಠ್ಯಪುಸ್ತಕಕ್ಕೆ

ಸಂಬಂಧಪಟ್ಟ ಅಥವಾ ಸಾಮಾನ್ಯ ಜ್ಞಾನಕ್ಕೆ ಸಂಬಂಧಪಟ್ಟ ಸಾರ್ವತ್ರಿಕ ಪ್ರಶ್ನೆಯಾಗಿರಬೇಕು.

ಉತ್ತರಿಸುವಾಗ ಸಮೂಹಕ್ಕೆ ಸೇರದ ಪದವೊಂದನ್ನು ಬರೆದರೆ ಸಾಕು.

ಉದಾ.—ಪ್ರಶ್ನೆ —कालिदासः, बाणः, सोमदेवः, सि. वि. रामन्।

ಉತ್ತರ — सि. वि. रामन्।

ಅಥವಾ

**प्रयोगं परिवर्तयत –** 4 x 1 = 4

ಇಲ್ಲಿ ಪಾಠದ ಕೊನೆಗೆ ಕೇಳಿದ ವಾಕ್ಯಗಳನ್ನೇ ಕೇಳಬೇಕು.

ಉತ್ತರ ಸ್ಪಷ್ಟವಾಗಿ ಸಂಸ್ಕೃತದಲ್ಲಿರಬೇಕು. ಪೂರ್ಣವಾಕ್ಯವೂ ಶುದ್ಧವಾಗಿರಬೇಕು.

ಈ ಪ್ರಶ್ನೆಗಳಲ್ಲದೇ ಇನ್ನೂ ಕೆಲವು ಸೂಕ್ತವಾದ ಪ್ರಶ್ನೆಗಳನ್ನು ಪಾಠ್ಯಪುಸ್ತಕದ ಅಭ್ಯಾಸದಲ್ಲಿರುವುಗಳನ್ನು ನಿರ್ದಿಷ್ಟ ಅಂಕಗಳಿಗನುಗುಣವಾಗಿ ಕೇಳಬಹುದು.

ಉದಾ. — व्याकरणविशेषं लिखत — ಇತ್ಯಾದಿ

ಶ್ರೀ ಶ್ರೀ ಶೃಂಗೇರಿ ಜಗದ್ಗುರು ಮಹಾಸ್ವಾಮಿಗಳವರ ಕೃಪಾಪೋಷಿತವಾದ
ಧಾರ್ಮಿಕ ಮತ್ತು ಆಧ್ಯಾತ್ಮಿಕ ವಿಚಾರಗಳಿಗೆ ಮೀಸಲಾಗಿರುವ
ಕನ್ನಡ ಮಾಸಪತ್ರಿಕೆ

# " ಶ್ರೀ ಶಂಕರ ಕೃಪಾ "

ಇಂದೇ ಚಂದಾದಾರರಾಗಿರಿ.

**ವಾರ್ಷಿಕ ಚಂದಾ ರೂ. 24-00**

ಹೆಚ್ಚಿನ ವಿವರಗಳಿಗೆ ಈ ವಿಳಾಸಕ್ಕೆ ಬರೆಯಿರಿ :


**ಪ್ರೊ|| ಎಸ್. ರಾಮಚಂದ್ರಶಾಸ್ತ್ರೀ**
ಸಂಪಾದಕರು
ಶ್ರೀ ಶಂಕರಮಠದ ಆವರಣ
ಶೃಂಗೇರಿ ಶ್ರೀ ಶಂಕರಮಠ
ಶಂಕರಮಠದ ರಸ್ತೆ
ಶಂಕರಪುರಂ, ಬೆಂಗಳೂರು-560004


---


ಈ ಪುಸ್ತಕವು ದೊರೆಯುವ ಸ್ಥಳ :

**ಶ್ರೀಸುರಸರಸ್ವತೀಸಭಾ**
**" ಶ್ರೀವಿದ್ಯಾತೀರ್ಥಕೃಪಾ "**
**ಶ್ರೀ ಶಂಕರಮಠದ ಆವರಣ, ಶಂಕರಮಠ ರಸ್ತೆ**
**ಶಂಕರಪುರಂ, ಬೆಂಗಳೂರು-560 004**

---

ಪ್ರಭಾ ಮುದ್ರಣಾಲಯ, ಬಸವನಗುಡಿ, ಬೆಂಗಳೂರು-560 004